(67)

83/7 अथ किरणावलि:

उदयनकृता

83/7

Kirnawali

83/7 ✓

गुणाकर्म्मतोर्निर्गुणात्तथागुणस्य तत्र समवायविरोधात् ॥ द्रव्यासमवायुत्वास्य कथमिति चेत् । इत्थम् ॥ नदिक्काल
मनसामयं नैव विशेषगुणविरहात् । सामान्यगुणस्य चाश्रयसहोपलंभनियमेन तदप्रत्यक्षताया
प्रत्यक्षत्वात् ॥ नात्मनो बाह्यकरणाप्रत्यक्षत्वादिदं तास्पदत्वाच्च । नापि न[illegible]श्चतो ग्राह्यगुणत्वात् । चाक्षु
षता हि गुणानां रूपैकद्रव्यसमवायेन व्याप्तात्स्वरूपित्वं गगनपवनाभ्यां व्यावर्त्तमानं चाक्षुषगुणासंबंध
मपि व्यावर्त्तयति । न तेजसः तत्पतीतौ तद्विरोधित्वात् । शैत्यवत् । गुणिनः स्वगुणप्रतीतिपरिपंथित्वे गुणा
स्य नित्यमनुपलंभप्रसंगात् । स्वाश्रयेण नैव प्रतिबंधात् । अन्यतिगुणिनि गुणास्यासत्वात् । तत्सहच
रितगुणांतरानुपलब्धेश्च । न तावत्कायात्तेजसो रूपभेदस्तद्रूपस्य शुक्लभास्वरत्वनियमात् । न चेंद्रनीलपद्मा
दिनाश्रयोपाधेरन्यथाभूतमिदमाजातीति सांप्रतम् । शैलन्यूतलस्फटिकपद्मरागाद्याश्रयरूपाननुविधा
नात् । तस्माद्गुणांतरमेवेदं तेजस इति वाच्यम् । तथा च तद्रूपे तदग्रहणं तद्विरूप एव तद्ग्रहणमिति विपरी

83/7

श्रीसोद्धिविधा॥ ...माणो गृह्य ...२
सो १

द्रपि व्याः नीलिमात्म ज्ञानावेसमारोप्यते।

१ तमिति महत्त्वनुपपत्तिः। नापि भाव पृथिव्येः आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात्। पार्थिवमेव द मारोपितं रूपमित्य १
पि न समीचीनम्। बाह्यालोक सहकारि विरहे चक्षुष स्तदारोपे सामर्थ्यात्। तदेव हि यन्यत्रे तरस मारोप्यते।
पित्तपीतिमवत्। तत्रैव वानियत देशे ... तदेशत्वं न दीपस्पणीयस्तिमहत्त्ववत्॥ उन्नयथापि तत्खुष्यन्नमंतरेण
प्रयत्नंच विद्धिः नुपपत्तिरेवैकत्रारोप्यत्वादन्यत्रारोपविषयत्वात् ह स्यत्र॥ न चालोकमंतरेण रूपग्रहणे चक्षुषः सामर्थ्यमित्युक्तं न चा
...ानमितिया रोप्यारोपविषयत्वादेतस्य पने भ्रांति संभवः। न चो नयोरन्य तरस्मिन्नप्यव्यापृतस्यैव चक्षुषो भ्रांतिजनकत्वं न चायम
...वट५ चाक्षुषः प्रत्ययस्तदनुविधानस्यानन्यथा ... सिद्धत्वात्॥ स्वप्नविभ्रमवन्मानस एवायं न चाक्षुष इत्येत
दपि नाशंकनीयं। निमीलितनयनस्य गेहे स्त्वंधकारो नवेति संदेहानुपपत्तेः॥ तस्मात्क्रियावत्त्वाद्गुणवत्त्वाच्च द्र
वेत? व्यवत्वं। क्रियावत्त्वादेव नाकाशाद्यात्मकम्। प्रत्यक्षत्वान्न मनः। रूपवत्त्वादेव न वायुः॥ स्पर्शविरहाच्च न पृथि
वी जलं तेजो वेति दशमं द्रव्यमिति प्राप्तमेतत्... नैवेति। नयस्कृतेस्य क्रियावत्त्वे रूपवत्त्वे चाक्षुषत्वसंगाद॥

अनेक द्रव्यसमवायि कारणः१ स्पर्शवतामेवारंभकं१ नांतरीकील व्याप्तिः

आलोकसहकारिण एव चक्षुषस्तत्र सामर्थ्यावधारणादित्युक्तम्। न चेदमद्रव्यं रूपित्वात्। द्रव्यं रूपवतो मूर्त्तिनांतरीयकत्वे
न निरवयवस्य परमाणुतयातीन्द्रियत्वापत्तेः। नाप्यनेकद्रव्यं द्रव्यस्पर्शरहितद्रव्यत्वेनानारम्भत्वान्मनोवत्। न च रूपव
त्तया स्पर्शोप्यनुमास्यते। तद्रहितस्यापि पुरुषादेर्हेतुत्वादारभ्यत्वं वा स्यात्। मनसोनुपलभ्यमानधर्मस्य स्वयम
नुपलभ्यस्य च... वादेवारंभानुपपत्तिरिति सांप्रतं। रूपवत्त्वस्य प्रागेवाप्रत्यक्षत्व... प्रसङ्गेनापास्त
त्वात्। प्रत्यक्षस्य चानुभवसिद्धत्वादित्यलं सर्वमभिसंधाय भगवान्मुनिराह॥ द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावा ज्ञानं
वस्तम इति। सोपि कथमालोकमंतरेणैव प्रतियोगिस्मरणाधिकरणग्रहणविरहे ... विधिमुखेन चाक्षुष
इति चेत्। न। यद्ग्रहे हि यदपेक्षं चक्षुस्तदभावग्रहेपि तदपेक्षते। एवं हि तदितरसामग्रीसाकल्यं स्यात्। ...
तदालोकाभावेप्यालोकापेक्षा स्यात्। यच्चालोकग्रहे तदपेक्षा स्यात्। न त्वेतदस्ति प्रत्युत विरोध
एव तस्मिन्सति हि तदभाव एव न स्यात्। किं तदपेक्षेण चक्षुषा गृह्येत। दिवा च प्रतियोगिनः प्रभामंड

अंधकार एव न स्यात्। प्रतियोगिप्रतियोगिव्याप्येतरसकल्यसामग्रीसा ...त्यतइति
कल्प्यं योग्यता।३ उक्तं वै परी
त्येत्=२

इहेति देशाधिकरणं
इदानीमिति कालाधिकरणं ४

त्वस्य ग्रहणव्यपदेशांतरे तदभावग्रह इति न किंचिदनुपपन्नम् ॥ अन्यत्रापि न रात्रिमप्रतिसंधायांधका ०
रग्रहः । रात्रिज्ञानं च दिवसमप्रतिसंध्याय निरस्तदीपवर्त्तिरविरश्मिजालः कालविशेषो ह्यत्र रात्रिरि
त्युच्यते ॥ गिरिदरीविवरवर्त्तिनस्तु प्रदीपयोगिनो न तिमिरावलोकिनस्तिमिरदर्शनं च्छन्नं स्मृतालो
का इति ॥ अधिकरणमपि दृष्टमनुमितं स्मृतं वा । इहेदानीमंधकार इति प्रत्ययात् ॥ विधिमुखस्तु प्रत्य
योऽसिद्धः ॥ नहि नञ्प्रयोग इत्येव विधिः । प्रलयविनाशावसानादिषु व्यभिचारात् । नञर्थान्तर्भावेन वाक्या
र्थपदप्रयोग इति तु समं समाधानमन्यत्राभिनिवेशात् । गतेः का गतिरिति चेत् । भ्रांतिः स्याभाविक्यां गतौऽभाव
रंकद्रव्यानुविधानानुपपत्तेः । प्रभालुत्पत्ते तेजःप्रभाश्रयेषु रत्नविशेषेषु छायादिवत्सेन स्यात् । छायातप
योर्मूर्तत्वेन समानदेशताविरोधात् छाययैव वर्तमानत्वे बहलतमे तमसि तेषामालोको न स्यात् ॥ आलोकं

बलवत्सजातीयग्रहणाकृतमग्रहणमेव
अभिभवः १

सतीनां क्रियावत्त्वा रूपस्पर्शत्वनियम इति
ज्ञानं भ्रमः २

द्रव्ये गच्छति यत्र यत्र तेजसोऽसंनिधिस्तत्र तत्र च्छायाग्रहणादन्य[illegible]देशतानिबंध[illegible]नो गतिभ्रम इति । कथं भावधर्मा १
वा १

धा३ ता१
तरेण वाभिन्नदेशायाया अप्युद्भवो न स्यात् । तस्मादावरके धर्मारोपोऽभाव इति चेत् । न । किंचिदेतत् । सारूप्य
तत्त्वाग्रहाविरहनिबंधनं त्वन्यत् । दृष्टं च दुःखाभावे सुखाध्यारोपः । यथा भारापगमे सुखिनः संवृत्ताः स्मः सं
योगाभावे वियोगाभिमान इत्यादि । एतेन नीलिमारोपो व्याख्यातः । अप्युक्तो नास्य च विरोधिता सारूप्यात्तदारो
पोपपत्तेः । अदृष्टादिकं चात्र नन्वेवं रक्तत्वारोपप्रसंगोऽपि । आरोपस्य निमित्तानुसरणात् । न तु निमित्तमस्ति
स्यारोपः ॥ अदृष्टादिकं चात्र निमित्तमवसेयम् । स्मर्यमाणं चैतद्रूपमारोप्यते रजतत्ववन्न तु गृह्यमाणमतो तु८
न सहकार्यपेक्षा चोद्यमाशंकनीयं । धर्मिप्रतीतिनिरपेक्षत्वात् । यद्येवमारोपितं नीलं रूपं न तमो भावस्तु तदि
ति विनिगमनानायको हेतुरिति चेत् । उच्यते । एषा तावदनुभवस्थितिः तमो नीलं न तु नीलिमा तम इति ॥ न चारो
पितेन वास्तवेन वा नीलिम्ना तमोबुद्धिव्यपदेशौ समानार्थौ सहप्रयोगानुपपत्तेः नीलीद्रव्योपरक्तेषु वस्त्रेषु च

भावाभावे३ योः

८ र्म्मादिषु तमो बुद्धिव्यपदेशप्रसंगाच्च। अवश्यं भावित्वं भाभावानुभवो निरालंबनस्य भ्रमस्यानुपपत्तेः ८
॥ न च तमः बाध्यते। नीलप्रत्ययस्तु बाध्यत इहेति प्रत्ययवत्। तस्माद्यत्र गुणक्रियारोपस्तदंधकारं भ्रतुनीलिमे
प्रत्ययो २ ति। सुष्ठूक्तं नवैवेति॥ गुणान्विभजते॥ गुणा इति। रूपादयः सप्तदश कंठोक्ताः सूत्रकारेण॥ अभ्युपगमसिद्धांतन्या
येनान्येपि सप्त सिद्धगुणाः स्वभावाः तत्र तत्र तेषां व्युत्पादनात्॥ अनभ्युपगमे व्युत्पादनविरोधात्। तथाच विभा
गसूत्रं न्यूनं। रूपरसगंधस्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इ २४
द्वेषौ प्रयत्नश्च गुणा इति हि तत्॥ अतआह॥ चशब्दसमुच्चिताः सप्तेति। अदृष्टशब्देन धर्माधर्मयोः संक्षेपेण तद्रू२
भिधानात्॥ न त्वदृष्टं नाम सामान्यमस्ति कार्यकारणसंस्थानगुणविशेषलक्षणानां व्यवस्थापकानामभावात्।
॥ एवं कंठोक्त्या समुच्चयेन चैकतया चतुर्विंशतिर्गुणा
तेन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दा इत्युक्तं भवति

वंर

व्यवहर्तव्याः तथाविध बुद्धिविषयतया सारूप्येतान्तु संख्यायोगेन यथाचैतत्तथा वक्ष्यामः॥ ॥कर्माणि विभ
जते॥ उत्क्षेपणेति। अत्रापि पंचैवेति स्पष्टार्थं विभाग वचनादेव पंचत्वसिद्धेः॥ आधिक्यमाशंक्याह। गमनग्रहणा
दिति। कर्मपदार्थे चैतद्व्युत्पादनीयं॥ ॥सामान्यं विभजते। सामान्यमिति। समानानां भावः स्वाभाविको नागंतुको
बहूनां धर्मः सामान्यमित्यर्थः। तथाच धर्मिणां बहुत्वे धर्मस्य चानागंतुकत्वे विवक्षिते नित्यमेकमनेकवृ
त्ति सामान्यमिति लक्षणं सूचितम्॥ तद्द्विविधं द्वैविध्यं दर्शयति। परमपरञ्चेति। एकव्यक्तिसमावेशोऽस्तीति च
कारार्थः॥ नैकव्यक्तिकं सामान्यमस्ति व्योमाकाशादीवद्यते नान्यूनानतिरिक्तव्यक्तिकं सामान्यमिति
बुद्धिरुपलब्धिर्ज्ञानमित्यादिपर्यायस्थितोनामेषोव्यभिचारीति निःक्रमणप्रवेशनादिजातिसंकरो ते
न सामान्यादिव्यक्तिकं अनवस्थानात्मलक्षणव्याघातादसंबंधाच्चेति। तस्मात्परस्परपरीहारस्थितिविरुद्धौ सामान्यं२
अविरुद्धं तु परापरभावस्थितीति नियमः। परं व्यापकमपरं व्याप्यमित्यर्थः। प्रमाणं सत्त्वयति॥ तथाच

एकद्व्या स्वरूपसंतत्ताः निःसामान्यमत्तद्रू२

ते२ त्वा३ यदि५ द विशेषात् ५

१० तिप्रत्ययकारणमिति। यदि सामान्यं न स्यात् विभिन्नेष्वनुगताकारप्रत्ययो न स्यात्॥ द्रव्यगुणकर्म्मणाम पि १०
सामान्यद्वारैवानुवृत्तिप्रत्ययहेतुत्वात्। परमुदाहरति॥ तत्रेति॥ परं सत्ता। सत्तासामान्यं परमिति व्यवहर्त्तव्यं॥
कुतो महाविषयत्वात् द्रव्यत्वादिभ्योऽधिकविषयत्वात्। एवमन्यत्रापि यदपेक्षयाधिकविषयं तत्तदपेक्षया परमिति
व्यवहर्त्तव्यं यथा सत्तेत्यर्थः॥ सा च सत्ता सामान्यमेव न तु द्रव्यत्वादिवद्विशेषोऽपि। कुतोऽनुवृत्तेरेवेति। न
नु सामान्यादिभ्यो व्यावर्त्तमानापि सत्ता स्वाश्रयं तेभ्यो न व्यावर्त्तयेत् द्रव्यत्वादिकमपि न व्यावर्त्तयेदवि
२१ शेषात् सत्ताया व्यक्तिस्वरूपमात्रव्यंग्यतया व्यंजकनियमाभावात्। बाधकाच्च सामान्यादौ तत्त्यागः सामा
न्यांतरस्य हि संस्थानगुणादिविशेषकार्यकारणादिव्यंग्यतया तेषां च नियतत्वात्। न सर्वत्रातिव्याप्तिः॥ तर्हि व
स्तु स्वरूपमेव सत्तास्तु॥ न च गोत्वाद्यभावेपि यदि गौरिति प्रत्ययानुवृत्तिः स्वरूपतः स्यात् तदाश्वादावपि
स्यादिति चेत्। यदि सत्तया विनापि सत्सदिति प्रत्ययानुवृत्तिः स्वरूपतः स्यात्तर्हि स्यादित्यनिष्टापत्तिरिति वाच्यम्।

भाव४

सत्त्वात्यानुवृत्तेः

तदनुवृत्तेस्तदभावेपीष्टत्वादिति न प्रत्ययानुवृत्तेर्निमित्तमंतरेणानुपपत्तेः। न च विशेषा एव तन्निमित्तं॥ लक्षण
मात्रं वा सामान्योच्छेदप्रसंगात्। न च विशेषो लक्षणं वा विहाय कश्चित्सामान्यात्मा व्यक्तिरस्ति। कथं तर्हि सामान्यादौ स
त्सदिति प्रत्ययः। सत्तैव समवायात्। गुणादिषु संख्यादिप्रत्ययवत्॥ अभावेपि [illegible] तर्हि स्यादिति चेत्। न तस्य
का३ सद्विरुद्धतयैव प्रतीतेरिति॥ द्रव्यत्वाद्यपरं। सत्तापेक्षयाल्पविषयत्वात्। तच्चेति च स्त्वर्थः। अपि समुच्चये
तो४ अनुवृत्तेर्हेतुत्वादिति हेतुमनुकर्षति। सत्तायामन्येषु चैकैकनिमित्तवशादेकैका संज्ञा इह तु निमित्तद्वयस द्रव्यत्वादौ ५
मावेशात्संज्ञाद्वयसमावेश इत्यर्थः॥ एतच्चोत्पादनप्रयोजनं सामान्यादौ न विष्यतीति विशेषानाह॥ ॥नि
त्येति॥ विशेषा इति बहुवचनेनानंत्यं लभ्यते। क्व ते अंत्याः अंतेऽवसाने च वर्त्तंत इति संतीति यावत्। परन्त्योऽ
परे विशेषा न संतीत्यर्थः। सामान्यरूपेभ्यो हि विशेषेभ्योऽपरेपि गुणादयो विशेषाः संति। परन्त्यस्तु ना
परे किंत्वेष एव वैशिष्ट्यं परिसमाप्यते। क्व ते वर्त्तन्त इत्यत उक्तं नित्येति॥ अयमर्थः॥ नित्यद्रव्येषु तावदाश्रय

दित्तिरेव विशिष्टबुद्धिरुपपन्नेति ततोऽधिकेषु विशेषेषु प्रमाणाभावः। नित्येषु तुल्यद्रव्येष्वाश्रयरहितेषु समा
नजातीयेषु समानगुणकर्मसु चाभ्युपगन्तव्यं व्यावर्त्तकेन धर्म्मेण व्यावृत्तत्वात्। न चैवं गुणादिष्वपि तत्कल्पनाव
काशः आश्रयविशेषेणैव तद्व्यावृत्त्युपपत्तेरिति प्रमाणसूचनं॥ तथा च वक्ष्यते। ननु तथापि सामान्यान्येव का
ति०४ नि चित्तथाभूतविषयं गुणा वा किं परस्परं तत्कल्पनयेत्यत आह॥ ते चेति॥ चस्त्वर्थः। अपकर्षः। ते पुनर्यद्येकैक
व्यक्तिवृत्तयः ... स्वरूपाः। अनेकव्यक्तिवृत्तित्वे च कथमत्यन्तव्यावृत्तिबुद्धिहेतवः। गुणा अपि भवन्तः सा
मान्यवन्तः स्युस्तथा चात्यन्तव्यावृत्तबुद्धिहेतुत्वं व्याहन्येत। अयतेनिःसामान्यास्तथा च गुणत्वव्याघात
स्तस्मा[illegible]देशात् व्यावृत्तबुद्धेरेव हेतुत्वाद्विशेषा एव विशेषाः। नान्यत्रान्तर्भूता इति॥ एकद्रव्याः स्वरूपसन्तो
विशेषा इति लक्षणं सूचितमित्येवं च निःसामान्यत्वे विशेषा य विशेषाय मित्यनुगतव्यवहार उपाधेर्लक्ष
दंत्य व्यप२

तां चोपाधिरध्यवसेय इति। समवायस्यैकत्वादिभागो नास्तीति लक्षणमाह॥ अयुतसिद्धानामिति॥ अयु
ताः प्राप्ताः सन्तः सिद्धा येऽत्वयुतसिद्धाः प्राप्ता एव सन्ति नाप्राप्ता इति यावत् तेषां संबन्धः प्राप्तिलक्षणः समवाय
स्तेन संयोगो व्यवच्छिन्नः तस्याप्राप्तिपूर्वकत्वात्। तथा च नित्यप्राप्तिः समवाय इति लक्षणं सूचितं भवति।
अजसंयोगाभावो वक्ष्यते। समवायस्य नित्यत्वं च॥ प्राप्तिपदेनैव च वाच्यवाचकादिभावलक्षणः संबन्धोऽन्
प्रसज्यते॥ एतदेव स्पष्टयति॥ आधाराधेयभूतानामिति॥ स्वभावतआधार्याधारभूतानां न त्वागन्तुकेन धर्मे
णेत्यर्थः॥ प्रमाणमाह॥ इहप्रत्ययहेतुरिति॥ इहेत्यादिः परः। इह पटे तन्तव इह गवि गोत्वमित्यादयः प्रत्ययाः सं
बन्धमन्तरेणानुपपद्यमानास्तं व्यवस्थापयन्तीत्यर्थः॥ अन्यापि शक्तिसंख्यासादृश्यादयः पदार्थाः किन्नोद्दि
ष्टा इत्यत आह॥ एवमित्यु[illegible] तेन क्रमेण षडेव धर्मिणस्तेषु द्रष्टव्याः कृता धर्म्मा विना धर्म्मा एव परं नोद्दिष्टाः। शक्त्यादीनां
मेष्वेवान्तर्भूतत्वात्। तथा च वक्ष्यामः॥ यद्यपि च सामान्यविशेषसमवाया नोलक्षणमप्युक्तं तथापि तस्येहाधुसा

किरणावली

पि॰

२२ दत्तानुक्तकल्पतयोद्देशःकृत इत्यत आह ॥ यद्यपि सामान्यधर्म्मा अषड्भ्यो नातिरिच्यंते तथापि त एव परस्परसंगतामापन्नाः परस्परविवेकायोपयुज्यंत इति पृथगुच्यंत इति अभिप्रायवानाह ॥ षसामपीति ॥ अभिरभिव्याप्तौ १२
अस्तित्वं विधिमुखप्रत्ययविषयत्वं प्रतियोग्यनपेक्षनिरूपणीयत्वमिति यावत् ॥ अभिधेयत्वमभिधानयोग्यता
शब्देन सं... गतिलक्षणः संबंधः ॥ ज्ञेयत्वं ज्ञानयोग्यता ॥ ज्ञाप्यज्ञापक... संबंधः ॥ नत्वेतत्त्रयमभावेप्यस्ती
त्यव्याप्तिः ॥ अस्तु नेहतदपेक्षयावैधर्म्यमिदं विवक्षितम् ॥ अपि तु षडपेक्षयासाधर्म्यं ॥ आश्रितत्वमाश्रयतासाक्षा
दिकी ॥ सा च नित्यद्रव्ये नास्तीत्यत आह ॥ अन्यत्रेति ॥ नित्यद्रव्याणि विहायेदं साधर्म्यमित्यर्थः ॥ ननु समवायेप्य
तन्नास्ति ॥ समवायस्य समवायाभावात् ॥ नाविपिस्वरूपावत आधारसन्निकर्षत्वात् तथाच वक्ष्यामः ॥ चकारा
न्मूर्त्तं विहाय निःक्रियत्वम् ॥ अथ समवायादिधर्म्मानितरेषां साधर्म्यमाह ॥ द्रव्यादीनामिति ॥ समवायित्वं सम
वायलक्षणः संबंधः ॥ अनेकत्वस्वरूपभेदः ॥ चकारात्समवायादन्यत्वं ॥ द्रव्यं विहाय पंचानांमाह ॥ गुणादीनामिति ॥

एव साधर्म्य॰

म५ स्त्रय॰

निर्गुणत्वं गुणात्यन्ताभावविशिष्टत्वम् ॥ निःक्रियत्वं क्रियाया असमवायः ॥ द्रव्यादीनां त्रयाणामिति ॥ सत्तासंबंधः समवा
यलक्षणः ॥ सामान्यविशेषाद्रव्यत्वादयस्तद्वत्त्वं ॥ निरूपपदेनार्थशब्देन द्रव्यादयस्त्रय एवाभिधीयंते नापरे ॥ एषए
व स्वसमयो वैशेषिकाणां स्वशास्त्रे व्यवहारो लघुत्वात् ॥ यथा धारणाध्यानसमाधित्रयमेकत्र संयम इ
तियोगानुशासने ॥ द्रव्यादित्रयं तत्प्रत्येकसमुदायाभ्यामिति विशेषः ॥ तदिदमुक्तं स्वसमयेति ॥ धर्म्माधर्म्मक
र्तृत्वं चेति ॥ साधर्म्यद्वयसूचनाय चकारः ॥ धर्म्मकर्तृत्वं मर्धं विहाय ॥ अधर्म्मकर्तृत्वं च धर्म्मं विहाय ॥ नन्व
द्रव्यादीनां जात्यादीनां कथं नेत्यत ॥ उच्यते ॥ विहितनिषिद्धभावनाधिष्ठानानां हि तद्धेतुत्वं ॥ न स्वरूपतः ॥ न च भावना
वेशो जात्यादिषु स्वरूपतो द्रव्यादिकर्म्मानंतर्भाव्य संभवति ॥ नित्यत्वेनाव्यापारत्वात् ॥ अनित्यधर्म्मी
योगेनाव्यापारित्वात् ॥ न च तानमात्रेण तेषां तदुपयोगो अभियोगवद् निषेधात् ॥ तस्मात्स्वाश्रयावच्छेदसमा
वेशेनोपयुज्यंत इति ॥ कार्यत्वमनुत्पादाभावित्वमनित्यत्वं तू त्वां भावित्वमिह विवक्षितम् ॥ अन्यथाकारणवत्ताम

आक्षेपादिंचवनवत॰२

अ॰न॰श॰कथ॰

१२ वेतिनियमो न स्यात्।तदनपेक्षान्विहायेत्येवकारार्थः।कारणत्वं त्वन्यत्र धर्मेतरकार्यापेक्षयान्यथापारिमां १३
डिल्यादिव्यवच्छेदस्याग्रहणान्नोपपद्यते।पारिमांडल्यं परमाणुपरिमाणम्।आदिग्रहणात्परममहत्त्वं
अंत्यावयविरूपरसगन्धस्पर्शपरिमाणानि।द्वित्वद्विपृथक्त्वपरत्वापरत्वानि विनश्यदवस्थद्रव्यसंयोगविभा
गवेगकर्माण्येतत्व चाश्रैः रमः संस्कारो ज्ञानं वा गृह्यते।द्रव्याश्रितत्वं च द्रव्यसमवायिकारणत्वं।एवं द्रव्यत्वादि
सामान्यविशेषपदार्थयोरतिप्रसंगः।तथाप्यव्यापकमत आह।।अन्यत्रेति।।नित्यद्रव्यत्वं तु परलक्षणे नित्यगुणेऽप
पिद्रव्यत्वं नित्यद्रव्यं नित्यगुणांश्च विहायेदं त्रितयसाधर्म्यमित्यर्थः।।आद्यसंयोगविभागौ वेगं नित्यवर्जं विहाय गुण
समवायिकारणतावत्त्वेति चार्थः।।सामान्यादीनामिति।स्वात्मसत्त्वं सत्ताविरहः।।बुद्धिलक्षणत्वं बुद्धिमात्रगम्यत्वं ल
क्षणम्।।ननु द्रव्यत्वादिवत्प्रमाणान्तरमस्तीत्यर्थः।।अनुवृत्तबुद्धिर्व्यावृत्तबुद्धिरिहेति बुद्धिरित्येव हि सामान्यादौ च प्रमे
माणमिति।अकार्यत्वमनादित्वं कथमिति चेत्।।अन्यथा।स्वरूपव्याघातात्।।सामान्यस्य हि कार्यत्वे व्यक्तिरिव समवा

सामान्यस्य२ जातिनिबद्धो धर्मः स्वभाव इत्युच्यते ४

यिकारणतास्यात्।तथा च तदुत्पत्तिविनाशयोर्जात्युत्पत्तिविनाशौ प्रतिव्यक्ति भिन्नं सत्सामान्यरूपतां जह्या
त्।अनेन तु व्यक्तेः पूर्वमपि सत्त्वान्न तत्कारणकं स्यात्।एवं पूर्वेतरपूर्वतमादिव्यक्तिभ्योऽपि प्राक्सत्त्वाद
नादित्वं सामान्यस्यान्यथा स्वरूपव्याघात इति।नित्यद्रव्याणां कदाचिद्विशेषाभावे व्यावृत्तिरपि निवर्तेत त
था च द्रव्यसंकरः स्यात्।न च स्वभावस्य सांकर्ये पुनरसांकर्यं स्वभावपरावृत्तिप्रसंगात्।ततः सर्वदेवासंकी
विशे ५ र्णतास्वभावैरेव विशिष्टानित्यनादय एव विशेषाः।समवायोऽपि नित्यः समवायः कथं समवायिकारणोत्पत्तौ न वेत्।नव विनाप
ना कथं न कार्यान्तरमर्यादामतिक्रामेत्।कथं चोत्पन्नो हि विनश्येत्।तथा च कथमुत्पद्येतापि नाव स्याद्विनाशि
नोऽनुत्पत्तेः।समवायान्तराभ्युपगमे च कथमनवस्थां नापादयेत्।कथं वा पश्चादुत्पद्यमानः संयोगलक्ष
णाप्राप्तेः स्वभावेन न स्यात्।अप्राप्तिपूर्विका प्राप्तिरिति हि तत्।नित्यसंबंधिषु तथानभ्युपगमाच्चेति।तस्मा
त्सुष्ठूक्तं सामान्यादीनां त्रयाणाम् अकार्यत्वमिति।अकारणत्वमनात्मधर्मकार्यापेक्षया।।असामान्यविशे

१४ षवत्वंअपरसामान्यविरहः।सचसामान्येष्वनवस्थानात्।विशेषेष्वपिसामान्यसद्भावेगुणतापत्तौपुनःसमानगुणेषु
विशेषांतरापेक्षायामनवस्थानादेवंसमवायस्यैकत्वात्समवायांतरापेक्षायामनवस्थानाच्चेति॥नित्यत्व
मनंतत्वं।तच्चाकार्यत्वात्।अनित्यत्वंहिकार्यतयाव्याप्तं।साचसामान्यादिभ्योव्यावर्तमानास्वव्याप्यमनि
त्यत्वमुपादायनिवर्तते।अकार्यमपिहियद्याकाशपरमाण्वादिसामान्यादिभ्योनिवृत्तंस्यात्पुनःसत्त्वस्यात्।तत
स्तदभावेनिरा।अयंकिंचिदपिनस्यादिति॥अथेशब्दानभिधेयत्वस्यसमयात्पेशब्दानभिधेयत्वम्।चकारात्कारणा
नपेक्षत्वमिति।उपलक्षणंचैतत्।एवमन्यदप्यूहनीयम्।तद्यथा।अनित्यधर्मत्वमविशेषाणामेव।नित्यत्वमकर्मा
णामेव।अयोगिप्रत्यक्षत्वंद्रव्यादीनांचतुर्णामेव।असमवायिकारणत्वंगुणकर्म्मणोरेव।असमवेतत्वंनित्यद्र
व्यसमवाययोरेव॥७॥ ॥इदानींद्रव्याणामेवसाधर्म्यंवैधर्म्यंचाह।पृथिव्यादीनामिति।कियतामित्यतआह।न
वानामपीति।अपिरभिव्याप्तौ।द्रव्यत्वयोगः।द्रव्यत्वमित्येतावतिवक्तव्येयोगग्रहणमुपलक्षणनियमार्थंअप

द्रव्यत्वसमवायः

कारणाना वात्व

विच्छिन्नदेशत्वात्सामान्यसमवाययोः।कथमत्रैवेदंनान्यत्रेतिप्रत्ययनियमइतिकेचिद्वादयन्ति।तत्रेदमत्रैवद्र
व्यत्वंवर्त्तते यतइत्युच्यते।अयमेवहिद्रव्यत्वस्यस्वभावोयदेतत्समवायंनियमाश्रयदेताभिर्व्यक्तिभिःसहनरूपा
दिभिः।गुणत्वंचरूपादिव्यक्तीरादायनपृथिव्यादिव्यक्तीरित्यादिवदुच्यते।द्रव्यत्वमेवनास्तिगोत्वादिवदनुपल
ब्धेरितिचेत्।न।कार्यानुमेयतोपलक्षणेनसाधर्म्येणाभिव्यक्तस्यसामान्यस्यसास्नादिसंस्थानाभिव्यक्तगो
त्ववदेवप्रतीतेः।अन्यथाकार्यानुमेयत्वमपिसामान्यानियतंनवस्थेवनस्यात्।कारणेषंहिसामान्येननियम्य
ते।कार्यत्वंच।तच्चस्वाभाविकमबाधनात्।बाधनात्वौपाधिकमितिविशेषः।व्यक्तेरभेदस्तुल्यत्वंसंकरोथानव
स्थितिः।रूपहानिरसंबंधोजातिबाधकसंग्रहः।व्यंजकचधर्मस्तुपादायजातिनिराकरणेगोत्वादिकमपिनस्यात्।
नहिसास्नादिसंबंधानवभासनेकस्यचिद्गोरितिप्रत्ययानुवृत्तिरस्ति।तस्माद्स्तिद्रव्यत्वम्।सामान्यारंभकत्वम
।स्वसमवेतकार्यकारित्वंसमवायिकारणत्वमित्यर्थः।गुणवत्त्वंगुणसमवायः।तदेतद्द्वयंनिमित्तंव्यवस्थापकम

परस्परप
रिहारेणस्थि
तयोर्धर्मयो
रेकत्रसमा
वेशोजाति
सांकर्यं

१५ द्रव्यत्वं तु द्रव्यव्यवहारनिमित्तमिति व्यवस्थेयम्। कार्यकारणाविरोधित्वं कार्यकारणयोरन्यतरेणापि १५
द्रव्यजातीयं न विरुद्धमित्यर्थः। अन्त्यविशेषवत्त्वं पृथग्द्रव्यजातीयस्यैव सम्भवतीत्यर्थः। अथवान्यत्रावयविद्रव्येष्व
इति न विरुध्यति। अनाश्रितत्वमाधारैकात्व्यभावता। नित्यत्वं द्रव्यत्वे सतीति बोद्धव्यम्। चकाराद्विपर्ययेण विशेष
रहितद्रव्यत्वमाश्रितद्रव्यत्वमनित्यद्रव्यत्वं चान्यत्र निरवयवद्रव्येऽन्यदिति। पृथिवीत्यादि। अनेकत्वं बहुत्वसं
ख्या। अपरजातिः पृथिवीत्वादिका। तद्वत्तात्समवायः। संस्कारवत्त्वाचेतिद्रष्टव्यम्। क्षितीत्यादि। क्रियास्पन्दस्त
द्वत्ता। मूर्त्तत्वमसर्वगतपरिमाणयोगः। परत्वापरत्वे गुणविशेषौ वक्ष्येते। वेगः संस्कारविशेषस्तद्वत्ता। आका
सर्वेषु३ शादीति। सर्वगतत्वं सर्वमूर्त्तेषु मूर्त्तेषु गतत्वं संबन्धः। परममहत्त्वप्रकर्षकाष्ठागतमहत्परिमाणयोगः। नन्वियत्ताप
रिमाणमिति चेत्। न। संख्यागुरुत्वयोरपि तथाभावप्रसंगात्। वस्तुवितस्त्यादिपरिकल्पनाभावे परमाणुत्वस्य तदभावइतिचेत्न।२
पि चाभावप्रसंगात्। तदभावेपि परममहत्त्वात् परिमितत्वं परमाणुरितिचेत्। न। तदभावेपि परममहत्त्वात्परिमितमेवा

Right margin notes: न्ननु त्वापा… कौमुसंस्का ८५

निकर्ष।

काशादीति। [illegible] इति चेत्। न। कश्चिद्विशेषः। तस्माद्वस्तुवितस्त्यादिप्रकर्षेवानितरेन्योन्याश्रयात्। ततः परस्परमहत्त्व
मनुवर्त्तमानो गुणविशेषः प्रत्यक्षसिद्धोऽपकर्षवः तस्य यत्रापकर्षकाष्ठा तत्परमाणुत्वं यत्र प्रकर्षकाष्ठा
या परममहत्त्वमपीति। सर्वसंयोगिसमानदेशत्वं सर्वेषां संयोगिनां मूर्त्तानां संयोगवृत्त्याकाशादयो देशास्तेषां
भावस्तत्त्वम्। पूर्वमाकाशाद्येव सर्वेषु मूर्त्तेषु वर्त्तत इत्युक्तं संप्रति तु त एवाकाशादिषु वर्त्तत इत्यपौनरुक्त्यम्। च
कारात्क्रियापरत्वापरत्ववेगविरहः। पृथिव्यादीनामिति। भूतत्वमौपाधिकं सामान्यम्। अथ जातिरेव
किं न स्यात्। न स्यात्। व्यंजकनियमाभावेन व्यक्तिनियमानुपपत्तेः। बहिरिन्द्रियग्राह्यगुणवत्त्वैव व्यंजिकेति
चेति। न। तदा मूर्त्तत्वमपि जातिरेव स्यात्। अवच्छिन्नपरिमाणस्य व्यंजकस्य सद्भावात्। एवमस्तु को दो
ष इति चेत्। जातिसंकरप्रसंगात्। तथाहि मनसि मूर्त्तत्वं मनसि भूतत्वं मिथः परिहारेणावर्त्तमानं पृथिव्यादौ
संकीर्य्येत। अस्तु तर्हि पृथिवीत्वाद्यनेकनिबन्धनप्रयुक्तिरेव भूतशब्दो क्षादिवदिति चेत्। न। एकनिमि प्रकृति॰ कर्ष६
अथवा पूर्वम्मूर्त्तेसंयोगपद्याकाशादिषु वर्त्तेते इत्युक्तं संप्रतिमूर्त्तेष्वेव न तु प्रत्येकं पृथिव्यादिषु वर्त्तेत इत्यपौनरु

१५ द्रव्यत्वं तु द्रव्यव्यवहारनिमित्तमिति व्यवसेयम्। कार्यकारणाविरोधित्वं कार्यकारणयोरन्यतरेणापि १५
नेनाश्य
द्रव्यजातीयं न विरुद्धमित्यर्थः। अन्त्यविशेषवत्त्वं यद्द्रव्यजातीयस्यैव सत्त्ववदित्यर्थः। अथवान्यत्रावयविद्रव्यम्
इति न विषयति। अनाश्रितत्वम् आधारैकाभावता। नित्यत्वं द्रव्यत्वे सतीति बोद्धव्यम्। चकारादपि पर्यायेण विशेष
रहितद्रव्यत्वम् आश्रितद्रव्यत्वम् अनित्यद्रव्यत्वं चान्यत्र निरवयवद्रव्येभ्य इति। पृथिवीत्यादि। अनेकत्वं बहुत्वसं न्यद्युत्वापार
ख्या। अपरजातिः पृथिवीत्वादिका। तद्वत्तात् समवायः। संस्कारवत्त्वाचेति द्रष्टव्यम्। क्षितीत्यादि। क्रियास्पन्दस्त कामुर्ससंस्कार५
द्वत्ता। मूर्त्तत्वम् असर्वगतपरिमाणयोगः। परत्वा... परत्वे गुणविशेषौ वक्ष्येते। वेगः संस्कारविशेषस्तद्वत्ता। आका
सर्वेषु शादीति। सर्वगतत्वं सर्वेषु मूर्त्तेषु गतत्वं संबंधः। परममहत्प्रकर्षकाष्ठापन्नमहत्परिमाणयोगः। नन्वियत्तापरि
रिमाणमिति चेत्। न। संख्यागुरुत्वयोरपि तथाभावप्रसंगात्। हस्तवितस्त्यादिपरिकल्पनाभावे परमाणुत्वस्या तदभावइ तिचेत्न।२
पि चाभावप्रसंगात्। तदभावेपि परममहत्त्वात्परिमितमेव परमाणुरिति चेत्। न। तदभावेपि परममहत्त्वात्परिमितमेवा

निकर्ष।

काशादीति। तदभावइति चेत्। न। कश्चिद्विशेषः। तस्माद्धस्तवितस्त्यादि प्रकर्षैकान्तिरेभ्यो व्यावृत्तः परस्परमहत्त्व
मनुवर्त्तत्व गुणविशेषः प्रत्यक्षसिद्धो दुरपह्नवः। तस्यैव यथा निकर्षकाष्ठया परमाणुत्वं तथा प्रकर्षकाष्ठ
या परममहत्त्वमपीति। सर्वसंयोगिसमानदेशत्वं सर्वेषां संयोगिनां मूर्त्तानां संयोगवृत्त्या आकाशादयो देशास्तेषां
भावस्तत्त्वम्। एवमाकाशाद्येव सर्वेषु मूर्त्तेषु वर्त्तत इत्युक्तं संप्रति तत एवाकाशादिषु वर्त्तत इत्यपौनरुक्त्यम्। च
कारात् क्रियापरत्वापरत्ववेगविरहः। पृथिव्यादीनामिति। भूतत्वम् औपाधिकं सामान्यम्। अथ जातिरेव
किं न स्यात्। न स्यात्। व्यंजकनियमाभावेन व्यक्तिनियमानुपपत्तेः। बहिरिन्द्रियग्राह्यगुणवत्त्वं व्यंजकमिति
चेत्। न। तद्वन्मूर्त्तत्वमपि जातिरेव स्यात्। अवच्छिन्नपरिमाणस्य व्यंजकस्य सद्भावात्। एवमस्तु को दो
ष इति चेत्। जातिसंकरप्रसंगात्। तथा हि मनसि मूर्त्तत्वं मनसि भूतत्वं मिथः परिहारेणावर्त्तमानं पृथिव्यादौ
संकीर्य्येत। अस्तु तर्हि पृथिवीत्वाद्यनेकनिबंधनप्रयुक्ता जातिरेव भूतशब्दो क्ष्णादिवदिति चेत्। न। एकनिमि प्रवृत्ति
अथवा पूर्वं मूर्त्तेषु सर्वेष्वाकाशादिषु वर्त्तते इत्युक्तं संप्रति मूर्त्तेष्वेव नन्तः प्रत्येकं मूर्त्तेषु वर्त्तते इत्यपौनरु कं६

१६ त्त्वे संभवति अनेकार्थत्वकल्पनानवकाशात्। तस्माद्वौक्तविषयाश्रयतया भूतानि सिद्धानि। प्रसिद्धा १६
नि भूतानीत्युच्यन्ते। इन्द्रियप्रकृतित्वमिन्द्रियोपादानत्वं तच्च नभसो ऽवच्छिन्नस्य च्छिन्नत्वेदकल्पनयो
पपादनीयम्॥ अन्यथा भूतत्वमित्यपं चमी समानतन्त्रे स्वतन्त्रे च मनसः पतद्धर्म्मो न स्यात्। प्रकृतिशब्दः
स्वभावार्थो वा। तथा च मनोव्यवच्छेदाय सन्निधिसिद्धबाह्यपदमनुषञ्जनीयम्॥ बाह्यैकैकेन्द्रियग्राह्यगु विशेष ४
णवत्त्वं बाह्यनानात्मगुणग्राहिणैकैकेन प्रतिनियतेनेन्द्रियेण साक्षात्कारिज्ञानसाधनेन ग्राह्याः ग्रहणयोग्या नप
ये गुणा गन्धादयः विशेषाः परस्परव्यवच्छेदहेतवस्तद्वत्त्वम्॥ अत्र विवक्षाभेदेन बाह्यैकैकेन्द्रियग्राह्यगुण
वत्त्वं बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वं चेति बोद्धव्यम्। चतुर्णां पृथिव्यप्तेजोवायूनां द्रव्यारम्भकत्वम्। द्रव्यसम
वायिकारणत्वम्। स्पर्शवत्त्वं स्पर्शसमवायः। उपलक्षणं चैतत्। अवान्तरापरत्वमहत्त्वस्थितिस्थापकसंस्कारयो
गः शरीरेन्द्रियारम्भकत्वं चेत्यपि द्रष्टव्यम्। द्वयायाः पृथिव्यप्तेजसां प्रत्यक्षत्वं बाह्येन्द्रियग्राह्यत्वं रूपवत्त्वं रूपस

मवायः। द्रवत्वं द्रवत्वसमवायः। संभाव्यते चैतद्द्वयोः पृथिव्युदकयोर्गुरुत्वं तत्कार्यं पतनं च। रसवत्त्वं रसो म
धुरादिस्तद्वत्त्वम्। आलोकप्रकाश्यत्वं अप्रभास्वररूपत्वं चेति चार्थः। मूर्त्तात्मनां पृथिव्यादीनां पञ्चानामात्मनां च वैशे
षिकगुणवत्त्वं स्वाश्रयव्यवच्छेदोपयिको ऽवान्तरसामान्यविशेषवन्तो वैशेषिका गुणा रूपादयो बुद्ध्यादयश्च
तद्वत्त्वम्। मूर्त्तगुणवत्त्वमपि द्रष्टव्यम्। क्षित्युदकात्मनां चतुर्दशगुणवत्त्वं संख्यामात्रेण साधर्म्यमेतत्। न च गु
णाः विशेषतो विवक्षिताः संभावितं चैतत्साधर्म्यमव्यापकं परमेश्वरात्मन्यसंभवात्। तानग्रे गणयिष्यती
ति। आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम्॥ क्षणिका आशुतरविनाशिनः एकदेशवृत्तयो ऽव्या
प्यवृत्तयो विशेषाय स्वाश्रयव्यवच्छेदाय गुणा विशेषगुणास्तद्वत्त्वम्। अत्रापि विवक्षाभेदादेकदेशवृत्तिविशेषगु
णवत्त्वं क्षणिकविशेषगुणवत्त्वं चेति द्रष्टव्यम्। आकाशे तादृशा गुणाः शब्दः आत्मनि तु बुद्ध्यादिः। दिक्कालयो
ः पञ्चगुणत्वम्। संख्यापरिमाणपृथक्त्वसंयोगविभागाः पञ्चैव गुणा दिशि काले च। सर्वोत्पत्तिमतां निमित्तका

१७ रणत्वं । तत्समवेतद्वित्वादिद्विपृथक्त्वादिसंयोगविभागवर्ज्जं सर्वोत्पत्तिमंति गृह्यंते । तेषां निमित्तकारणत्वादि
श्चात्मा । नहि दिशाकालानपेक्षं किंचिदुत्पद्यते । तथा च व्यपदिश्यते इहेदानीं जातं इति । गेहे जातो गोष्ठेजा १७
त इति । अनिमित्तमपि गेहादि तथा व्यपदिश्यत इति चेत् । न । तस्याप्यधिकरणतयैव निमित्तत्वात् । नह्यधिक
करणत्वमकारणत्वमिति । यद्येवं संप्रदानतया अदृष्टद्वारा चाधिष्ठातृतया चात्मनामपि सर्वोत्पत्तिमन्नि
मित्तकारणत्वमस्ति । तत्कथमनयोरेवोपन्यास इति चेत् । सत्यम् । अधिकरणतया तु सर्वोत्पत्तिमन्निमित्तत्वं
विवक्षितम् । पृथ्व्यादिहि दिक्कालोपाध्यधिकरणा । सर्वस्योसत्तिर्नैवमात्मोपाध्यधिकरणेति । परत्वापरत्वानुमे
यत्वं चेति चार्थः । क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः । अग्निसंयोगान्निमित्ताद्युत्पद्यते द्रवत्वं तत्समवायः । सु
वर्णादौ तैजसे घृतादौ पार्थिवे । एवं सर्वत्र विपर्ययात्साधर्म्यं वैधर्म्यं च वाच्यमिति । एवमनेन न्यायेन साधर्म्यं यत्त
देव विपर्ययाद्व्यावृत्तेर्वैधर्म्यं । वैधर्म्यं च तदेव विपर्ययादनुवृत्तेः साधर्म्यं । अथ[वा] साधर्म्यविपर्ययोप्यस्मात् सा

वैधर्म्य द्वि १

साधर्म्य द्वि

धर्म्यं वैधर्म्यविपर्ययोप्यन्यस्माद्वैधर्म्यं च स्वयमूहित्वा वाच्यम् अध्यापकेन ग्राह्यं च शिष्यैरिति । तद्यथा
गंधवती पृथिवीति वैधर्म्यं वक्ष्यति तद्विपर्ययात् । निर्गंधत्वमबादीनां साधर्म्यं उक्तं जलक्ष्म्योः साधर्म्यं गुरुत्वं
रसवत्त्वं च तद्विपर्ययादितरेभ्यो वैधर्म्यं विपर्ययस्त्वितरेषां तेजःपवनादीनां साधर्म्यमगुरुत्वं नीरसत्वं च । एवमात्मानं विहा
य परार्थत्वमचेतनत्वं च । मनो विहाय नांतःकरणत्वमनणुकरणत्वं च । आत्मनो विहाय निःस्नेहत्वमक्लेदत्वं च । तेजो विहा
यानुष्णत्वमदाहकत्वं च । जल[…]तिरनिलानामपाकजस्पर्शवत्त्वं । जलज्योतिषो[…]रपाकजरूपवत्त्वं दिक्कालमनसां वैशे
षिकगुणविरहः । वाय्वाकाशदिक्कालमनसामतींद्रियत्वं । आत्ममनसोः शरीरावच्छे[…]वृत्तित्वान्नः । वाय्वादीनां नी
रूपत्वं । आकाशादीनां स्पर्शशून्यत्वं । कालादीनां[ना]मूर्तत्वमित्यादि । तदेवमुक्तैर्व्यस्तादिभिर्[…]भिरितरेभ्यो वि[…]वेचि
तं न तु मध्यवर्तिभिरंत्यविशेषवत्त्वादिभिरव्याप्तेः । किंतु क्रियानपि विवेकः सिद्ध्यतीत्युक्तम् । न चैतावते वक्तृतत्कृत्यद

नापि परस्परतो व्याप्तेः १

१८ मविवेकस्य तावदस्यात्तत्कुतो विवेकः स्यादित्यपेक्षायामाह ॥ इहेदानीमिति। इह प्रकरणे इदानीमवसरप्राप्तावैवे १८
कमित्येवावतेवचरितार्थविशेषस्य प्रत्ययापादानं वीप्सायां त्वयस्य ज्ञापनार्थम्। पृथ्वीत्वाभिसंबंधात् पृथिवीति
। पृथिवीत्वं सामान्यविशेषस्तेनाभिमतः संबंधः समवायलक्षणस्तस्मात् न त्वेकार्थसमवायसंयुक्तसमवा
यादेरित्यर्थः। ननु पृथिवीस्वरूपसिद्धौ किं लक्षणेनासिद्धौ साधनस्यावैयर्थ्यात् तदसिद्धावाश्रयासिद्धेः। न।
स्वरूपसिद्धावपि व्यवच्छेदस्य साध्यत्वात्। तथाहि॥ पृथिव्यबादिभ्यो भिद्यते। पृथिवीत्वात्। यत्तु नेतरेभ्यो भ
भिद्यते नासौ पृथिवी। तस्मादितरेभ्यो भिद्यते। तथाप्यप्रसिद्धविशेषणः पक्षः। इतरव्यवच्छेदस्य क्वचिद
प्यप्रसिद्धेः। सिद्धौ वा साधनवैयर्थ्यात्। न। इतरव्यावृत्तेर्वैदोषेव प्रत्यक्षसिद्धत्वात्। किं [illegible] राच
न्तरेणोत्साकात् पृथिवीत्वनिमित्ताक्रान्ते व्याप्त्या ऽवच्छेदव्यावृत्त्या व्यावृत्तिर्व्ये सिद्धेति साध्यत इति। न दोषः।
अथ किमेतल्लक्षणम् उच्यते। केवलव्यतिरेकि विशेषणवल्लक्षणम्। तथा चाचार्याः। समानासमानजा

यथा बादि न चेयं न पृथिवी। ४

हेतु१ भेदे२ वा३

तीयव्यवच्छेदो लक्षणार्थ इति। एवं तर्हि पृथिवीत्वनिमित्ताक्रान्ते व्याप्त्या व्यवच्छेदव्यावृत्त्या व्यावृत्ति
रेव चिन्न सिद्धेति पुनरप्यप्रसिद्धविशेषणत्वमायात इति चेत्। न। पक्षसंबंधिनो विशेषस्य सर्वत्राप्रमि
तस्यैव साध्यत्वात्। प्रसिद्धो हि धर्मो धर्मिण्यन्वेति न तु धर्मान्तरे ततयैव प्रसिद्धः साध्यते। तथा च सति
साधनवैयर्थ्यादिति। तथापि घटादेरेवेतरव्यावृत्तिः प्रत्यक्षसिद्धा तत्सदृष्टान्तबलेनान्वयादेव परमाणवादि
साध्यतां किं घटादिकमपि पक्षे निक्षिप्य व्यतिरेक आद्रियत इति चेत्। आस्तां तावदयं सुहृदुपदेशः। केवलव्यति
रेकिलक्षणं निरूढं। व्यवहारसिद्धिर्वा लक्षणप्रयोजनं। तथाहि विवादाध्यासितं द्रव्यं पृथिवीति व्यवह्रि ५
यते लोकेन। पृथिवीत्वात्। यत्तु न पृथिवीति न व्यवह्रियते न सा पृथिवी यथा बादि। न चैवेयं पृथिवीति। त
स्मात्तथा व्यवह्रियत इति। अत्रापि व्यवहारविषयस्य स्वरूपतः सिद्धौ नाश्रयासिद्धिः। पृथिवीव्यवहारस्य

सामान्यतः १

सम्मुग्धस्य सिद्धेर्न्नोप्रसिद्धविशेषणत्वं। व्याप्त्यानिमित्तविशेषवतः साध्यत्वान्न साध्या न वैयर्थ्यं। सर्वे पृथिवीपक्षीकरणेनान्ना कि०णा०ली

१८ न्वयित्वं। यद्यस्यान्वयव्यतिरेकावनुविधत्ते तत्तद्धेतुकं यथा घटादिर्मृदादिहेतुकमनुविधत्ते च पृथिवीव्यवहारः पृथि १८

वीत्वस्यान्वयव्यतिरेकाविति चेत्। न। पृथिवीत्वनिमित्तकत्वे पृथिवीव्यवहारस्य साध्ये ऽन्वयाभावात्। केवलं सर्व्वे

नामव्यवहारमात्रेणायं क्रीयमन्वयः। स च व्यतिरेको न्नाम्नि यत्ते विवक्षाभेदादिति। यत्तु नराहुर्षणोऽलक्षणांचिह्नंलिं मंडनाचार्यैः ५

गमिति पर्याय इति। तदसत्। व्यावृत्तौ व्यवहारे वा साध्ये ऽन्वयिनोऽनवकाशात्। व्युत्पन्नस्य स्वयमेव व्यवहारात्। अव्यु

त्पन्नस्य सपक्षपरिचयाभावात्। कथं तर्हि क्रियावद्द्रव्यमिति द्रव्यलक्षणमुपपद्यते। द्रव्यस्यैवायमसाधारणो ध

र्म्मः। समवायिकारणत्ववद्गुणवत्त्ववच्चेति प्रतिपादनार्थम्। न तु लक्षणत्वेन। द्रव्यमात्रं पक्षीकृत्य व्यावृत्तिसाध

ने ऽनागासिद्धत्वात्। न तु द्रव्यमात्रपक्षीकरणे ऽप्यसाधारणत्वादिति। तस्माद्वायुमनसोरप्रत्यक्षत्वेन द्रव्य

त्वविप्रतिपत्तौ क्रियावत्त्वेन तत्प्रसाध्यत्वे भागासिद्धिः परिहरणीयेति तात्पर्यं। ये तु प्रमाणमेव सर्वस्य व्यवस्था

पकं न तु लक्षणं तदपेक्षायामनवस्थामाहुः। तेषां निन्दामि च पिबामि चेति न्यायः। यतो व्याप्तिः विप्रतिप

त्तिहारेण तत्तदर्थव्यवस्थापकं तत्तद्व्यवहारव्यवस्थापकं च प्रमाणमुपादद्ते तदेव तु लक्षणं। अनुवा

दः स इति चेत्। अस्माकमप्ययमनुवाद एव। न ह्यलौकिकमिह किंचिदुच्यते। न चानवस्था वैद्यकादौ रोगा

दिलक्षणवद्व्याकरणादौ शब्दादिलक्षणवच्च व्यवस्थोपपत्तेः। तत्रापि हि संमुग्धव्यवहारमाश्रित्य लक्षणे

नैव व्युत्पत्तिरिति। क्षित्युदकात्मना चतुर्द्दशगुणवत्त्वमिति साधर्म्यमुक्तं। तत्र के ते चतुर्द्दश गुणाः। पृथिव्यामतश्चा

ह। रूपेत्यादि। न तु गन्धसाहचर्याद्रूपादयोऽप्यसाधारणतामापन्ना इति युक्तम्। केवलस्यैव गन्धस्यासाधा

रणत्वे विशेषणानां सामर्थ्यात् तच्चानुपदमेव स्फुटयिष्यति। एषु सूत्रकारसंमतिमाह। एते चेति। गुणानां वि

निवेशो द्रव्येषु समवायः। सप्रतिपाद्यत्वेनाधिक्रियते ऽस्मिन्निति द्वितीयोऽध्यायस्तत्र रूपरसगन्धस्पर्शवतीपृ

तल्लर

२० थिवीतिसूत्रकारवचनात्सिद्धाः। ० चाक्षुषवचनात्सप्त संख्यादयः। इति संख्यापरिमाणानि पृथक्त्वं संयोगवि २०
भागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणीति सूत्रे संख्यादीनां चाक्षुषत्वे हेतुत्वेन रूपिद्रव्यस
मवाय उक्तः। न चासिद्धस्य हेतुत्वं मतस्तेपि रूपवत्यां पृथिव्यां सप्त सिद्धाः। पतनोपदेशाद्गुरुत्वमिति। संयोगाद्य
भावे गुरुत्वात्पतनमिति पतने गुरुत्वस्य हेतोरुपदेशात्पतनवत्यां पृथिव्यां गुरुत्वमपि सिद्धं। ० न ह्यसिद्धस्य हेतुत्वं
नापि व्यधिकरणस्य कर्म्मासमवायिकारणत्वम्। ० नोदनादिषु विपर्ययासदर्शनादिति। ० अद्भिः सामान्यवचना
द्द्रवत्वमिति। ० सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यमिति सूत्रे सर्पिरादीनां द्रव
त्वमद्भिः समानो धर्म इत्युक्तमतो द्रवत्वमपि सिद्धं। ० उत्तरकर्म्मवचनात्संस्कार इति। ० नोदनादाद्यमिषोः क
र्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं चेति सूत्रे इषुकर्म्मोपदेशेन पार्थिवद्रव्यस्योत्तरस्मिन्क

नां ३ ३ ३। जनकस्य ३ँ वस्तु। गावत्द्रव्यसंयोग। ४

र्म्मणि संस्कारः कारणं तयोक्तः ततः सोपि सिद्धः। उपलक्षणं चैतत्। आद्यकर्म्मकार्य्यतयाप्युक्तस्तत्रैव सिद्ध इ
ति द्रष्टव्यम्। यदनेन सूत्रकारसंमतिप्रदर्शनव्याजेन सर्वत्र प्रमाणमादर्शितम्। ० तथा हि रूपादिष्वेकादशसु
त्व प्रदेशे पतनलिंगकमनुमानं गुरुत्वे अग्निसंयोगान्वयव्यतिरेकानुविधायितयानेदमिहद्रवीरादिवत्संयु
क्तसमवायेनान्यस्येति प्रत्यक्षमेव सोपपत्तिकं द्रवत्वे निरंतरोगतिसंतानु एव वेगव्यवहारहेतुरितिं दुर्दुरू
द विप्रतिपत्तिव्युदासाय कार्यलिंगकमनुमानं संस्कार इति। एवं गुणवत्त्वेन द्रव्यत्वे व्यवस्थिते पृथिवीत्वव्य
वस्थाहेतूननुगुणविशेषानाकृष्य दर्शयति। क्षितावेव गंधो वर्त्तते न द्रव्यांतरे तेन गंधसमवायः पृथि
वीत्वव्यवस्थाहेतुरित्युक्तं भवति। यत्तु सुगंधि सलिलं सुरभिः समीरण इति तत्पार्थिवकुसुमाद्यधिवासनि
बंधनं तदन्वयव्यतिरेकानुविधानात्। न तु स्वभावत इत्यवसेयम्। ननु तथाप्यव्यापको गंधः क्षितेर्द्वयस्य
माषाषुमणिवज्रादिष्वनुपलब्धेस्तत्कथं तद्व्यवस्थाहेतुः। न। पाकेन पूर्वरूपपरावृत्तौ रूपांतरोत्पत्तौ च पा

२१ कि॰ला॰ची

२१

कत्वरूपस्य गन्धसहचरतया तत्रापि तदनुमानात्। अनुद्भूतत्वात्तु तदनुपलंभस्तत्र इवेत्यभिप्राय २१
वानाह। रूपमनेकप्रकारं शुक्लादि क्षिताववेत्यनुवर्त्तते। यद्यपि शुक्लादिरूपं समुच्चयेनन संभवतीति स हिजा
तिसमुच्चयो विरोधाभेदेवानुपपन्नः। व्यक्तिसमुच्चयोपि न व्याप्यवृत्त्यनुपलंभबाधितत्वात्। नाव्याप्यवृत्ति
प्यद्व त्रिजातीयं द्वाविरोधात्। किमेतर्हि चित्ररूपमिति यथा शुक्लमिति शुक्लं जातीयं तथा चित्रमिति चित्र
जातीयं व्याप्यवृत्त्यवा प्रत्येकं च न क्षितिव्यवच्छेदहेतुर्नीगासिद्धत्वात्। तथापि क्रमेण शुक्लाद्यनेकरूप
समवायलक्षणः समुच्चयः क्षिताववेव। किंच शुक्ले शुक्लतर शुक्लतमाद्यवांतरानंतजातिमद्रूपं क्षितावे
वनान्यत्र जलस्य शुक्लत्वेपि नावांतरतारतम्यमस्ति। पार्थिवद्रव्यसंसर्गात्तथा प्रतिभासः। एवं तेजसो
पि शुक्लभास्वरैकस्वभावस्य नावांतरविशेषाभावः। ये पुनराहुः। शुक्लत्वादिकमेव सामान्यं ना

अपि त्रानित्या त्रिः१

स्तिकुतस्तत्वीतरतारतम्यमात्रकैकाष्ठवहि शुक्लारुपादिरूपव्यक्तयो नित्या इव्यव्यक्तिनिष्ठं त्यंते
तारतम्यं लम्भूषामा अयमिश्रतया यथायथाहि धवलेद्रव्ये कृष्णद्रव्यावयवानुप्रवेशस्तथा तथा तारतम्या व
तदयुक्तं भासइति तेषामाश्रयस्थितावपि पावकसंयोगात्पूर्वरूपनिवृत्तिरुत्तररूपोत्पादश्च न स्यात्। अनंतव्य
क्तिसमावेशस्य निरतिशयस्य नित्यस्य सामान्यादन्यत्वं नोपपद्यते। अस्तु शुक्लत्वादिकं सामान्यमेवेति तर्हि
चेन्न गोत्वादिना परापरभावानुपपत्तौ जातिसंकरप्रसंगादिति॥ ॥रसः षड्विधो मधुरादिरिति। अस्यापि व्या हु५
त्तिर्मणिपादिषु गंधवत्पाकजरूपेणानुमानात्। अत्राप्यवांतरानेकसामान्यविशेषवान्रसः पृथिव्यामे
वेति वाक्यार्थः। अपामेव मधुर एव रसः स्वभावतः। अवांतरभेदास्तु नारिकेलादिजलगताः पार्थिवद्र
व्योपाधिकाः। तेन गंधवती पृथिवी। अवांतरानेकसामान्यविशेषवद्रूपवती अवांतरानेकसामान्यवि
शेषवद्रसवती चेति लक्षणार्थः॥ स्यादेतद्यथा रूपवत्त्वाविशेषेपि त्रयाणामनेकविधरूपवती पृथिवी

सलक्षणार्थं ० अत्र हि स्पर्शवतीत्युच्यमाने जलाद्यतिव्याप्तिः स्यात् पाकजवतीत्युच्यमाने तेजसा पाकजद्रवत्ववता ऽतिव्याप्तिः अतः पाकजस्पर्शवतीति कि०ग्र०ली ४

२२ स्पर्शश्च यस्य रूपवज्जलं शुक्लं भास्वररूपं तेजः । तथा गंधावांतरभेदमाश्रित्य द्रव्यभेदः स्यादित्यत आ २२
ह ॥ जघोदि विषयस्तु भिन्नसुरभिश्चेति । भिन्नतावेवेत्यनुवर्त्तते नद्रव्यांतरे । पाकजस्य सुरभ्यसुरभ्यमेकस्मिन्नेवद्रव्ये
कालभेदेन वर्त्तमानः प्रकारभेदवानपि न द्रव्यांतरव्यवस्थाहेतुरिति भावः । स्पर्शो ऽस्याः पाकजो पाकजस्प विलक्षणइत्या
र्शवतीह पृथिवीति । अत्र गंधरूपरसानां पाकजत्वं सर्वविस्फुटत्वान्नोक्तम् ॥ स्पर्शस्य तु तथात्वे विप्रतिपत्तिः न हास्पर्शइ
हि गंधादिवद्विशेषतः स्पर्शः पाकजस्यान्वयव्यतिरेकावनुविधत्ते । पार्थिवत्वमात्रेण तथा कल्पने परमाणा ति । यद्यपि
दिष्वपि तथा कल्पनाप्रसंगात् । तदेतद्विप्रतिपत्तिबीजमपनिनीषन्नेवोक्तवान्पाकजः स्पर्शइति यदि हि पा नजस्पर्शोऽनु
कजो न स्यात्संख्यापरिमाणादिवदविशिष्टः स्यात् । तथा चाशीविषवृश्चिककीटादिदंशेषु स्वकसिंबिद्ध ष्णाशीतस्पर्श
श्चिकपत्रिकादिषु च स्पृष्टेषु दृष्टो दुःखविशेषो नोपपद्येत । मणिमूलादिविशेषेषु च स्पृष्टेषु तदुपशमो स्तथापि नपा
कजः ३

नस्यात् । गवादिचाण्डालादिस्पर्शविधिनिषेधौ च न स्यातां । नचद्रव्यमात्रे तावुपपद्येते । दर्शनस्पर्श
ने [illegible] घ्राणास्वादनभेदेन मातंगमदिरादिप्रायश्चित्तभेदानुपपत्तिप्रसंगात् । ततः पार्थिवस्पर्शोऽपि पा
कजः । पार्थिवविशेषगुणत्वाद्गंधवदित्यवधातव्यम् ० येतु मन्यंते पृथिव्यां स्पर्शो नास्त्येव ० अग्न्यादिस्पर्शे
त्यविहाय स्पर्शान्तरस्यानुपलंभबाधितत्वात् ० शैत्यमेव हि तेजःस्पर्शेनाभिभूतं ओष्ण्यं चोदक
स्य स्पर्शेनाभिभूतम् ० अनुष्णाशीतत्वेनानुभूयत इति तान्प्रत्याह । अनुष्णाशीतत्वे सतीति ० द्रवत्व
सजातीयग्रहणाग्रहणं खल्वभिभवः । तथा चाभिभावकमन्यतरदवश्यमुपलभ्येत नचैवं प्र
कृते किंतु शैत्योष्णत्वानुपलंभेऽपि तद्विलक्षणः स्पर्श उपलभ्यत एव तथा विधेतरः सिद्धः पार्थिवद्रव्यस्ये
ति भावः । सेयं पृथिवी यच्च नित्यैव तदावयवानवस्थास्यात् । एकस्य कस्यचिद्द्रव्यस्य निवृत्तौ निराश्रयं

किं०मा०टी
कि०मा०टी

२३ त्वकार्य्यमापद्येत॰ अथ नित्यैव निःप्रामाणिका तर्हि स्यात॰ कार्य्यं च गंधवदपि द्रव्यांतरमापद्येतेत्यत आह । २३
॰सा लुद्धिविधा॰ नित्या चानित्या चेति॰ चकारौ मिथः समुच्चयार्थौ नियमनिराकरणतापरौ॰ तेन नोक्तदोषाव
र काश इत्यभिप्रायः॰ का पुनर्नित्या महती हि मही महत्वादेव कार्य्यत्वादनित्या॰ अणुपरिमाणा नोपलभ्य
त एवेत्यत आह॰ परमाणुलक्षणा नित्येति । लक्षणं स्वभावः कार्य्यमेवात्र प्रमाणं न विष्पतीत्यभिप्रायवताने
ह प्रमाणान्तरमादर्शितम्॰ तथाहि । स्थूलस्य कार्य्यस्य लोष्टादेरवयवक्रियाविभागादिन्यायेन विभज्यमानस्या
ल्पतरस्याल्पतमादिभावायतो नाल्पीयस्तं परमाणुमाचक्ष्महे । एषश्चावयवावयविप्रसंगो निरावधिर्न चिर
वधिरेवानंतावयवारब्धत्वाविशेषणमेरुसर्षपादीनां परिमाणाभेदानुपपत्तेः । न च कारणसंख्यायाश्च
विशेषेपि परिमाणस्य चैर्यविशेषो द्विशेषद्वति युक्तम् । तयोरपि संख्याविशेषाभावेऽनुपपत्तेः । नापि प्रलया
वधिः कस्यचिदंतस्य निरवयवत्वे तदनुपपत्तेः॰ द्रव्यस्यावयवविभागविनाशाभ्यां विनाशा वात । नापि वि
प्रसिद्धलावेवसंभोगः २ विनाशा

प्रसंग इति द्वि २
भागावधिस्तस्य विभज्यमानानाश्रयतया तदभावे तदनुपपत्तेः॰ न चैकाश्रय एवेति विभाग इति युक्तम् । किं
चिद्विभक्तश्चिद्विभज्यते न तु तदेव तस्मात् । तस्मान्निरवयवावधिरवयवावयविविज्ञायते । तद्धितमेतन्नत्व
प्रमितमिति चेत् । अत्र कश्चिदाह । किं तत्र प्रमाणगवेषणाया । त्रसरेणोः प्रत्यक्षसिद्धत्वात् । तस्य चावयव
कल्पनायां प्रमाणाभावेन निरवयवत्वादिति । तदसत् । तस्य चाक्षुषद्रव्यतया महत्वादनेकद्रव्यवत्वाच्चेति । यदि
द्रव्यस्य चाक्षुषता महत्वमंतरेण स्याद् दूरदूरतरादौ न महत्परिमाणाप्रकर्षमनुविदध्यात् । यदि च सानेक
द्रव्यवत्तां नाङ्गीयेत महत्वमपि नाङ्गियेतु । तद्धाप्यत्वोतस्यापि व्याप्तिः कारणत्वात् । अन्यथा तत्प्रकर्षमह
त्वप्रकर्षो नानुविदध्यात् । तस्माद्विवादाध्यासित त्रसरेणुर्महान् अनेकद्रव्यवांश्चास्मदादिचाक्षुष
त्वात् । घटवदिति । अपरस्त्वाह । अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वान्महत्प
रिमाणतारतम्यवदिति । तदप्यसत् । पराश्रयदोषप्रसंगात् । नासौ परमाणुः संस्तर्हि तदवयवापवका
रस्य १

२४ योऽनुमिताः परमाणवः। न ह्येतेऽपि महतोऽणोरूपविशेषवतां चाक्षुषत्वप्रसंगात्। तथा च कार्यत्वे प्रमाणानव २४
स्थेरेतदवयवानुमानं। यद्यपि चाणुत्वान्निरवयवत्वाच्च तेषां महत्परिमाणारंभेन कारणां महत्त्वप्रचये।
स्तस्तथापि बहुत्वसंख्यास्तीति सर्वं समंजसं। नोक्तोत्तरत्वात्। अवश्यं हि त्रसरेणोरवयवैरनेकद्रव्यैर्भवितव्यं
तस्य महत्त्वात्। महत्त्वं प्रति चावयवगतस्यानेकद्रव्यस्यापि कारणत्वात्। अन्यथा महत्त्वस्योत्प्रकर्षानुविधा
धानानुपपत्तेः। तस्मात् त्रसरेणोरवयवाः सावयवाः महद्द्रव्यारंभकत्वात् तंतुवत्। बहुत्वं चात्र परिमाणप्रचयानु
पपत्तौ महदारंभकत्वात्। तुल्यपरिमाणप्रचयतत्त्वे च संख्याधिकसंख्यातंतुवत्। ते च न स्यं ते सावयवत्वाद्घट
वत्। विपक्षे बाधकमूर्त्ततर्कः। तदवयवानां त्ववयवकल्पनानवकाशः प्रमाणाभावात्। बाधकसत्त्वा
च्च। द्रव्यारंभकत्वमूर्त्तत्वादीनामनुकूलतर्काभावात्। अनवस्थाप्रसंगस्य च प्रतिकूलस्य स्फुटत्वादि
ति परमाणुसिद्धिः। तस्मा[illegible]द्य कार्यद्रव्यं तत्सावयवमिति सम नियम सिद्धौ कार्यद्रव्यत्वेन सावयवत्वं

किंचित्तस्य र्भवत्वेवाच द्वयो

यसाध्यत एवावयवा कार्यत्वं व्यावर्त्तते ह निरवयवं परमाणुमुपपादयिष्याम इति अभिप्रायवानाह
॥कार्यलक्षणाणिवेति ।तुशब्दः परमाणोर्व्यवच्छिनत्ति॥ किमत्र प्रमाणमत आह।।साचेति। येयमुक्तरूपा
दृश्यते सा प्रत्यक्षसिद्धेत्यर्थः। स्थैर्य्ये स्थिरता चिरकालावस्थायित्वमिति यावत्। आदिग्रहणाद्विष्टंभकत्वं
जलादिव्यूहविरोधित्वं च। अवयवसन्निवेशास्तत्तत्सामान्यविशेषाभिव्यंजकसंस्थानविशेषाः। स्थै
र्यादीनि चावयवसन्निवेशाश्च तैर्विशिष्टा न ह्येतद्द्रव्यांतरे संभवति। जलादीनां [illegible] पनिपातमात्रेणैव
भंगुरत्वात्। न च पार्थिववदंभोद्रव्यांतरं [illegible] ष्टृज्ञाति। पूर्वव्यूहं वा विरुंद्धि। न च पार्थिववत् द्रव्यांतरं तत्त
ज्जात्यभिव्यंजकसंस्थानभेदवदिति। यतस्तत्तत्संस्थानभेदवती। अत एवापरजाति बहुत्वोपेतानां तु सर्वस्य
चेतनादन्यस्य परकार्यत्वात्। किंमूलया चेतनप्रयोजनं साध्यतद्युत आह।।शयनेति।।आसनमवस्थि
तिः। आदिग्रहणाद् [illegible] कृषिकर्म्मादि। चकारादन्निघातादनेकोपकारकरीत्व[illegible]

२५ ति। तद्विदं पारार्थ्यमस्याः किं विषयत्वेयेव नेत्युच्यते। किंतु त्रैविध्येनेत्युतत्राह॥ त्रिविधेति। शरीरमिंद्रियं विष २५
य इति संज्ञापस्य तद्दितयोक्तम्‌ एतेन शरीरत्वमिंद्रियत्वं विषयत्वं वा न जातिरस्ति। प्रथमद्वितीययोः पृथिवीत्वा
दिना परापरभावानुपपत्तेः तृतीये निःसामान्येष्वपि सामान्यभावयोर्विषयत्वात्। तस्मादन्त्य
दवच्छिन्नात्मनिष्ठभोगस्यायतनं शरीरम्‌। शरीरसंयुक्तं साक्षात्प्रतीतिसाधनमतींद्रियमिंद्रियम्‌॥
प्रतीयमानतया भोगसाधनं विषय इति॥ लक्षणारूपोपाधिनिबंधना एताः संज्ञा इति। चस्त्वर्थे। क्ष्यादिस्त्रि
[illegible] वायोर्हि चतुर्विधं कार्यं न तु प्रवृत्तीनां चैकविधमेवेति॥ अनेकावांतरप्रकारवच्छरीरारंभिका
पृथिव्येवेत्यन्यदुद्व्यांतरमित्यभिप्रायवांस्तदेव दर्शयति। शरीरं द्विविधं योनिजमयोनिजं चेति॥ ननु योनिजव
न्न्ययोनिजं शरीरमुपलभामहे इत्यत आह। तत्रेति। देवानामृषीणां च श्रूयते हि ब्रह्मणो मानसा मन्वादय
इति॥ ननु कारणमंतरेण यदि कार्यं स्यात्कार्यमेव न स्यात्। स्यादृष्टादिव्यतिरेकेणापि चादादिरिति॥

ति० आ० टी० किं०णा

व्यवच्छिन ति ८

न शरीरत्वस्योष्मजत्वस्य मशकादिनिर्व्यभिचारात्। संस्थानविशेषवत्त्वासिद्धेः। त्रिदशाः स्वर्गलोकेऽनेक
मन्वंतरायुषोऽनिमिषचक्षुषो नंदनचारिणः कामगाः त्रिनयनचतुर्भुजादयः अस्मदादयस्तु दशदशाः
शतवर्षपरमायुषः परिच्छिन्नचक्षुषो [illegible] भूचराः प्रतिहतगतयो द्विनयनद्विभुजाः किंचित्संस्थान
साम्ये [illegible]गोगवयादिवज्जातिभेदोपपत्तेः। न च संस्थानमपि योनिजत्वे नियामकम्‌। मनुष्यगोगजभु
जगादीनां तद्भावेऽपि योनिजत्वात्। तस्मात्सर्वेषां स्वकर्मनिबंधनो भोगः। तद्वत् जन्मांतरीयकतया जन्मा
युषी आक्षिपति। तत्र येन कर्मणा गर्भवासादिदुःखमपि भोजयितव्यमस्ति तेन योनिजमुत्पाद्यते। यदव
न तथान्यथेति युक्तमुत्पश्यामः॥ तदेतदाह॥ धर्मविशेषेति। अणुभ्य इति मूलकारणनिर्देशो न त्वणुभिरेवारभ्य
शरीरमारभ्यते। तदेतदग्रे व्यक्तीकरिष्यति। द्व्यणुकादिक्रमेणेति। क्षुद्रजंतूनां मशकादीनां यातनाशरीराणि।
यातना नरकपीडा तस्यै शरीराणि यातनाशरीराणि। इत्यत्र नारकिणामिति शेषः। क्षुद्रजंतूनां शरीराणीति

संस्थानि संस्थानभेदविवक्षया भोक्तृभोगायतनविवक्षया वा षष्ठी । अधर्मविशेषः प्रकृष्टो धर्मः तत्स
हितेभ्यः नहियेनिजं शरीरमयः कुंभीपाकक्रकचदारणादिदुःखसहनक्षमं । नापि नरकयातनासु योनि
स्पर्शसुखमानुषं गिकमपेक्ष्यते । नच नरकाण्येव न संति प्रत्यक्षाद्यसंगादिति । द्वयोनिशब्देन
यदि कारणमात्रमुच्यते तदा द्वैविध्यं नोपपद्यते तत्यतत्राह । शुक्रेति । संनिपातः परस्परमेलकं तज्जं योनिजं प
शवो ग्राम्याश्चतुःपदाः आरण्या मृगाः । गर्भवेष्टनचर्मपुटं जरायुः पक्षिणो विहङ्गमाः । सरीसृपाः परि
तः सर्पणशीलाः सर्पकीटमत्स्यादयः । यद्यपि चोद्भिज्जो पिष्टक्षारयः शरीरस्नेहतयैव व्याख्यातमुचिता
त्या याप्यतिमंदांतःसंज्ञतया लोकप्रसिद्धसुखदुःखभोगोऽतिरिक्तमप्रमीषामस्तिवसत्त्वायेणाजंग
मोपकारकतया तदधीनतया च विषयता विवक्षितेयं तर्ह्योव्याख्यास्यते । कथाचिद्विवक्षयां तर्हि तम
पि स्युः व्याख्यायते । यथा यथार्थत्वेन विपर्ययत्वे सति स्वप्नसंशय ज्ञाने लोकप्रसिद्धिमाश्रित्य ।

कयाचिद्विवक्षया पृथक्कृतमप्यंतर्भाव्य व्यवस्थाप्यते यथा प्रमितेरन्यत्वेनाविद्यापि यथार्थत्वेन स्मृतिर्विद्यायां कयाचिद्विव
क्षया सदपि किंचिद्रूपमनभिधाय रूपांतरमुच्यते यथाऽत्रैव रूपरसगंधानां पाकजत्वमनुक्त्वा सौरभाद्युक्तं शरीरेंद्रियार्थ
णुकादिप्रक्रममुपेक्ष्य योनिजत्वाद्युक्तमित्याद्याचार्यशैलीयं कथं पुनरेतत् इच्छाद्वेषादयः प्रतिनियतनोद्यधिष्ठिताः जीवनमरण
स्वप्नजागरणरोगभेषजप्रयोगबीजसजातीयानुविधानानुकूलोपगमप्रतिकूलापगमादिभ्यः प्रसिद्धशरीरवत् नचैते संदिग्धासि
द्धाः आध्यात्मिकवायुसंबंधात् सोऽपि मूले निषिक्तानामपां दोहदस्य पार्थिवस्यैव धातोरुपादानात् तदपि वृद्धिर्भग्नक्षतसंरो
हणाच्चेति । अन्यथा कारणं विना कार्योत्पत्तिप्रसंगे सर्वमिदमाकूलं न विशीर्णमापद्यतेति संक्षेपतः आगमश्चात्रार्थे बहुतरोनुसंधेय
इति कथं पुनर्मानुषादिशरीरं पार्थिवं गंधक्लेदपाकव्यूहावकाशदानेभ्यः पांचभौतिकमिति हि प्रसिद्धिः सत्यं पंचानां कारणत्वमात्रेण
न तु समवायितया । अथ तथैव किं न स्यात् । इत्थं द्व्यणुकादिप्रक्रमेण तावदयमारंभ इति वक्तव्यं तत्र यदि विजातीयपरमाणुभ्यामे
कमारभ्यते अगंधमरसमित्यापद्येत एकस्य गंधादेरनारंभकत्वात् अनारंभकत्वे वा ततोत्पत्तिप्रसंगात् । अपेक्षणीयाभावात् । अ
थानेकस्यापि कुतस्तत्र प्रस्यंते समवायिकारणस्यापेक्षणीयत्वात् । नह्यनपेक्षितसमवायिकारणम समवायिकारणमा
रभतइति देहे । तदेकत्रापि तुल्येन न्यायेन तत्त्वादिगतानां रूपादीनां अनेकेषामेवारंभकत्वदर्शनादन्यत्रापि तथा कल्पयितुं यु

कं कारणानां सजातीयतया तत्र तथोपपत्तेः विजातीयानामारंभकत्वे त्वन्यथापि न विषयतिं चिपदोन्नाधकाभावात् तेनो .... तूलं २७
सुरभिः समीरणाद्युत्पाद्युपपद्येत। न। एकेन गुणेन गुणारंभे जातिसंकरप्रसंगात्। तथा हि गंधवत्वात्र द्व्यणुकं पृथिवी सजातीयं
सांसिद्धिकद्रवत्वाच्छीतत्वाच्च जलं स्यात्। एवं भास्वररूपत्वादुष्णत्वाच्च तेजः स्यात्। अपाकजानुष्णाशीतस्पर्शाद्वा वायुः स्यात्। तदयं
प्रमाणार्थः गंधवदेति द्व्यणुकानि गंधवद्भिरेव परमाणुभिरारभ्यंते। कार्यत्वे सति गंधवत्वात् पार्थिवपरमाणुद्वयारब्धद्व्यणुकवत्। वि
वादाध्यासिताः परमाणवो गंधवंत्येव द्व्यणुकान्यारभ्यंते गंधवत्वात्। ये पुनर्निर्गंधान्यारभ्यंते। न ते गंधवंतः। यथा निर्गंधजलाद्या
रंभकाः परमाणवः। न च न ते गंधवंतः तस्माद्गंधवंत्येव द्व्यणुकान्यारभंते। न दृष्टान्ताभावः सिद्धिर नियमारंभे सजातीयान्यामप्यारंभाभ्युपगमात्
अन्यथा निर्गंधस्य जलादेः नीरसस्य अनलादेः नीरूपस्य पवनस्यानुपलंभप्रसंगः। एवं सांसिद्धिकद्रवत्ववति द्व्यणुकानि तथाभूतैरणु
भिरारभ्यंते कार्यत्वे सति सांसिद्धिकद्रवत्ववत्वात्। आप्यपरमाणुद्वयारब्धद्व्यणुकाद्यारंभकाइत्यादि स्वयमूहनीयं तस्मात् सजाती
यानामेवारंभकत्वं न विजातीयानामिति स्थितं। तथापि शरीरस्य कथं पार्थिवत्वे विनिश्चयः इत्थं क्लेदादीनां परावृत्तावपि शरीरस्य प्रत्य
भिज्ञानात्। गंधस्य च यावद्द्रव्यभावित्वात्। घटवत्। यथा हि घटादौ पार्थिवे क्लेदशोषदशयोरपि गंधोऽनुवर्त्तते तथा स्यात् यस्तु कु
सुमादिवासितजलादिगंधव निवर्त्तते तथा शरीरेपीति। तदुक्तं पार्थिवत्वमत्र धार्यतेइति इंद्रियमाह। इंद्रियमिति गंधव्यंजकं यदि
× कवत्। जलपरमाणवः शीतान्येव द्व्यणुकान्यारभंते शीतत्वात्। ये पुनरशीतान्यारभंते न ते शीताः यथा शीततेजो द्व्यणु ५४

मा॰ हरि॰

कादयः प्राणग्रहणेनैव जलादयः ओषधिग्रहणेनैव तद्विकाराः तंडुलतैलादय इति। ननु कोयं द्व्यणुकारि
प्रक्रमो द्व्यणुक एव प्रमाणाभावात्। त्रसरेणव एवास्तावत् प्रत्यक्षसिद्धाः ते च चाक्षुषद्रव्यत्वाद्वै महांतो द्रव्य
स्य चाक्षुषतां प्रति रूपविशेषवन्महत्त्वस्यापि कारणत्वादन्यथा दूरतरादौ तत्प्रकर्षानुविधानानुपपत्तेः।
महत्त्वे सति रूपवत्त्वाच्च ते सावयवाः कार्यत्वाच्चान्यथावयवगतसंख्याद्यनुपपत्तौ महत्त्वानुपपत्तेः। नि
त त्यत्वे प्रकर्षकाष्ठाप्राप्तत्वाच्च अणुत्वस्य महत्त्वविरोधात्। न च त्रसरेण्ववयवा अपि सावयवास्तदवयवकल्प
नायां प्रमाणाभावात्। न हि त्रसरेण्ववयवोऽपि महांतो रूपविशेषवंतो महतां चाक्षुषत्वप्रसंगात्। यद्यपि
ह च ते महत्त्वव्यावृत्तेरणुपरिमाणा निरवयवत्वाच्च प्रचयवंचितास्तथापि बहुत्वान्महत्कार्यद्रव्याण्यारभ्यन्ते हु॰
तथा च परमाणव एव त्रसरेण्ववयवा इति कुतो द्व्यणुकं। उच्यते। महतः कार्यस्य कार्यद्रव्यारब्धत्वनियमा
द्व्यणुकसिद्धिः। अन्यथा परमाणुभिरेव बहुत्वसंख्योपेतैर्महद्द्रव्यारंभे गोघटादेरपि तैरेवारंभात् आंतरालिक
त्वात्पतरादिकार्योपलंभविरोधात्। तदा हि त्र्यणुकवद्बहुपलक्षितरेखोपरेखोघटादिरपि स्यात्। तथा

प्रशिश्चल ४

२८ चसंस्थानन्नेदानु पलंभेतदन्निव्यंग्यघटत्वादिकमपिनोपलभ्येत नचारम्भकाप्यारम्भेतद्वितितदुपलंभो
पपत्तिः।मूर्त्तानासमानदेशत्वानुपपत्तेः।न्यूनाधिकदेशतयासमानदेशत्वेनाविरोधइत्यपिनास्ति।न्यूनदेश २८
तयाहियत्रनास्तितत्राधिकदेशस्यस्थितिंमाविरोत्सीत्।स्वदेशेचविरुध्यादेव।तत्राप्यविरोधेमूर्त्तत्वेजद्या
त।अवयवरूपादिवत्।संयोगिन्यपिवादेशेन्यूनाधिकदेशतयासमानदेशत्वाविरोधःस्यात्।नन्वेदंचनाचक्लिन्न
देशघटादिःसंयोगेनवर्त्तते।कथंतर्हिचरमादितंत्वपकर्षणेस्वल्पतरतम्भादिपटोपलंभइतिचेत्।न।प्रतिबंध
कविगमेऽवस्थितसंयोगेभ्यःखंडपटोत्पत्तेः।आद्यादितंत्वपकर्षणेत्वयाप्येषवरीतिरनुगंतव्या।ह्याहिद्वितंतुका
दिपटपर्य्यंतसमस्तकार्य्यविनाशेखंडपटानुत्पत्तौचतंत्वतिरिक्तंनकिंचिदुपलभ्येत।नन्वेषविचारोद्व्यणु
केष्वपिसमानः।तैरपिहियदिबहुभिःकार्य्यद्रव्यमारभ्यतेघटादयोप्यारभ्येरन्।तथाचांतरालिकाकार्य्यपर
परानुपलंभप्रसंगः।अणवस्त्रसरेणुरेवारभ्यतइतिनियमःपरमाणुभिरपिसएवारभ्यतइतितुल्यंविशेषावा
वक्तव्यः।यथाह्यवयवावयविप्रसंगःपरमाणुष्वविश्राम्यति।तथायमवयवसंख्यापकर्षःक्वचिद्विश्राम्येत्।नच
उच्यते। यम।

हातंबोपंपत्तेः

त्तमपकर्षकाष्ठाद्वित्वैकत्वयोःसंभवात्।तत्रैकमनारंभकमवयवसंयोगानुपपत्तावसमवायिकार
णाभावात्।अनेकसंख्याभावेत्वावयविनोऽवयवापेक्षयाधिकपरमाणोनुपपत्तेः।अवयवापेक्षयाऽवयवि
नोऽधिकपरिमाणनियमात्।एकस्यचावयवस्यविभागानुपपत्तौतत्कार्य्यस्यविनाशासंभवेनित्यत्वप्रसंगादि
ति।तथाचद्वित्वमपकर्षपर्य्यन्तस्तदादिरयमारंभः।तच्चद्वाभ्यांपरमाणुभ्यामारब्धंकार्य्यनमहत्।तथात्वेतस्यका
मध्यदि५ रणाभावात्।तदपिद्व्यणुकं नारभेत।यदिद्वित्वसंख्यायुक्तमेवारभेत।उभयथापितदुत्पादनवैय
र्थ्यस्यात्।तस्मात्तेनमहद्द्रव्यमारभमाणंबहुत्वसंख्या योगि मेवेतिनियमः।नचद्व्यणुकवत्पर
माणवोपिबहुत्वसंख्यामाश्रित्यमहत्कार्य्यमारभ्यन्तइतियुक्तम्।अनिमारंभस्यनिषिद्धत्वात्।कारणाका
भ रणस्यकार्य्यकार्य्यजातीयप्रत्यनारंभकत्वात्।नहितंतवःपटमारभंतेतत्कारणंचांशवइति।तस्माद्विवादाध्या
सितास्त्रसरेणवोननिरवयवद्रव्यारब्धाः।सावयवद्रव्यारब्धाइतिवामहत्वेसतिकार्य्यत्वात्।उभयवादिसि
द्धद्व्यणुकारब्धत्रसरेणुवद्घटवद्वेति।एवंतर्हिद्व्यणुकमपिननिरवयवद्रव्यारब्धंवाकार्य्यद्रव्यत्वात्।त्रसरे

२४ सावयवद्रव्यारब्धो।

२९ वसस्थानन्त्रेदानुपलंभेतदन्निव्यंग्यघटत्वादिकमपिनोपलभ्येत नचारभ्याप्यारंभेतद्द्दतितदनुपलंभो
पपत्तिः। मूर्त्तानांसमानदेशत्वानुपपत्तेः। न्यूनाधिकदेशतयासमानदेशत्वेनाविरोधइत्यपिनास्ति। न्यूनदेश २९
तयाहियत्रनास्तितत्राधिकदेशस्यस्थितिंमाविरोत्सीत्। स्वदेशेन्वविरुध्यादेव। तत्राप्यविरोधेमूर्त्तत्वेजघा
त। अवयवरूपादिवत्। संयोगिन्यपिवादेशेन्यूनाधिकदेशतयासमानदेशत्वाविरोधःस्यात्। नचोदचनावच्छिन्न
देशोघटादिः संयोगेनवर्त्तते। कथंतर्हिचरमादितंत्वपकर्षणेस्वल्पतरतन्त्वादिपटोपलंभइतिचेत्। न। प्रतिबंध
कविगमेऽवस्थितसंयोगेऽन्यःखंडपटोत्पत्तेः। आद्यादितंत्वपकर्षणेलयाप्येषैवरीतिरनुगंतव्या। द्यणुकादिहितंत्वका उप
दिपटपर्य्यंतसमस्तकार्य्यविनाशेखंडपटानुत्पत्तौचतंत्वतिरिक्तंनकिंचिदुपलभ्येत। नन्वेषविचारोद्व्यणु
केष्वपिसमानः। तैरपिहियदिबहुभिःकार्य्यद्रव्यमारभ्यते घटादयोप्यारभ्येरन्। तथाचांतरालिकार्य्यपर
परानुपलंभप्रसंगः। अथैतेत्रसरेणुरेवारभ्यतइतिनियमःपरमाणुभिरपि सएवारभ्यतइतितुल्यंविशेषोवा
वक्तव्यः। यथाह्यवयवावयविप्रसंगःपरमाणुषुविश्राम्यति। तथायमवयवसंख्यापकर्षःक्वचिद्विश्राम्येत्। नच
उच्यते। यम। हातंवोपपद्यो

अयदि त्रुट्यपकर्षकाष्ठादित्वैकत्वयोःसंभवात्। तत्रैकमनारंभकमवयवसंयोगानुपपत्तावसमवायिकार
णाभावात्। अनेकसंख्याभावेचावयविनोऽवयवापेक्षयाधिकपरमाणोरनुपपत्तेः। अवयवापेक्षयाऽवयवि
नोऽधिकपरिमाणनियमात्। एकस्यचावयवस्यविभागानुपपत्तौतत्कार्य्यस्यविनाशासंभवेनित्यत्वप्रसंगादि
ति। तथाचद्वित्वमपकर्षपर्य्यन्तस्तदारभ्यमाणःतच्चद्वाभ्यांपरमाणुभ्यामारब्धंकार्य्यंनमहत्। तथात्वेतस्यका
अयदि रणाभावात्। तदपिद्व्यणुकं [illegible] नारभेत। यदिद्वित्वसंख्यायुक्तमेवारभेत। उभयथापितदुत्पादवैय
र्थ्यंस्यात्। तस्मात्तेनमहद्द्रव्यमारभमाणंबहुत्वसंख्या [illegible] योगि [illegible] मेवेतिनियमः। नचद्व्यणुकवत्पर
माणवोपिबहुत्वसंख्यामाश्रित्यमहत्कार्य्यमारभ्यन्तइतियुक्तम्। अनिर्माणस्यनिषिद्धत्वात्। कारणाका
श्रै रणास्यकार्य्यकार्य्यजातीयंप्रत्यनारंभकत्वात्। नहितंतवःपटमारभंतेतत्कारणंचांशइति। तस्माद्विवादाध्या
सितास्त्रसरेणवोननिरवयवद्रव्यारब्धाःसावयवद्रव्यारब्धाइतिवामहत्त्वेसतिकार्य्यत्वात्। उभयवादिसि
द्धघणुकारब्धत्रसरेणुवद्घटवद्वेति। एवंतर्हिद्व्यणुकमपिननिरवयवद्रव्यारब्धंवाकार्य्यद्रव्यत्वात्। त्रसरे

 सावयवद्रव्यारब्धं।

१० एवं द्व्यणुकवदिति स्यात्। न स्यादनवस्थाप्रतिहतत्वादिति द्व्यणुकादिप्रक्रमसिद्धिः पर्यवसिता पृथिवीति॥ ॥
॥ ॥ अथेदानीमपो निरूपयति॥ ॥ अप्त्वाभिसंबन्धादिति। अप्त्वं नाम सामान्यविशेषस्तेन। अभिसंबन्धादित्यादि पू
र्ववद्व्याख्येयम्। तासां द्रव्यत्वसिद्धये गुणानाह। रूपरसेत्यादि। तत्र प्रमाणानि सूचयति। पूर्ववदिति। पूर्वं यथा पृ
थिव्याः सूत्रकारवचनाद्रूपादयः सिद्धास्तथाप्स्वपि रूपादय इत्यर्थः। तथा च सूत्रं रूपरसस्पर्शवत्य आपो द्रवाः
स्निग्धा इति। यथा चाणुवचनात् संख्यादयः पृथिव्यां तथाप्स्वपि। यथा पतनोपदेशात् पृथिव्यां गुरुत्वं
तथात्रापि। यथा नरककामवचनात् पृथिव्यां संस्कारस्तथा पापायस्वपीति। एवं गुणवत्त्वेन द्रव्यत्वे सिद्धे पृथि
व्यादिव्यवच्छेदहेतोरप्त्वस्य व्यवस्थाहेतून् विशेषानाह। शुक्लमधुरशीता एव रूपरसस्पर्शा इति। सन्तु स्पर्शो
ऽग्निसंयोगेनाप्यपरावर्त्तमानम्। अभास्वरं शुक्लमेव रूपमप्सु। न हि पार्थिवे परस्फटिकादौ वर्त्तमानं शु
क्लमपि रूपमग्निसंयोगान्न परावर्त्तते। अपराकृतमपि चातेजसि नाभास्वरम्। तस्मादनेन विशेषेण रू
पं तद्व्यवस्थाहेतुः। एष तु विशेषः। पृथिवीरूपस्य पाकजत्वप्रदर्शनेन न तेजोरूपस्य नाभास्वरत्वख्या

माधुर्यं

पनेन सूचितः। उक्तापुक्तैरेव जलादिरूपस्यापाकजत्वम्। पार्थिवा एव हि संसृष्टान्नागस्तत्र क्वाथेन
पच्यन्ते। एतेन रसो व्याख्यातः। न हि पार्थिवे क्षीरशर्करादौ वर्त्तमानमपि माधुर्यं पाकेन व्यावर्त्तते। इह तु सहस्रश
श्च पच्यमानानामपि माधुर्यमेव। ईषत्त्वनावृतत्वं दपितयेव। यत्पुनर्मधु सिंधुभेदेन क्षारादिरप्रिरसः प
यसामुपलभ्यते स दशमूली कषायस्यैव पार्थिवद्रव्यौपाधिकः। कथमन्यथा तस्यैव घनपीतमुक्तस्य स
मधुर एव। एवमपां स्पर्शोऽपि शीत एव। क्वचित्सन्नपि तेजःस्पर्शाभिभवान्नोपलभ्यते। तदपगमे पुनरुप
[illegible]लभ्य इति। तदेवं निर्विशेषे रूपरसस्पर्शा अप्त्वव्यवस्थापका इत्युक्तं। स्नेहस्तु स्वरूपत एवेत्याह। स्नेहो
ऽपामेवेति। अत्र केचिदाहुः। स्नेहो न जलधर्मः। तैलादिवज्जलेऽप्यनुपलब्धेः। नापि पृथिव्या विशेषगुणः। स
र्वपृथिव्यव्यापकत्वात्। तस्मात्पार्थिवविशेषेषु घृततैलवसादिषूपलभ्यमानः सामान्यविशेषोऽयम्। गव्यमा
हिषादिषु दधित्ववदिति। तदसत्। स्निग्धः स्निग्धतरः स्निग्धतम इत्यादिभेदेन सातिशयत्वात्। न च गोमहिष्यादि
षु गुणमनाश्रित्य तारतम्यमस्ति। न हि पयसा मधुरातिमधुरवदीष[illegible]ज्जोरतिशयेन गोरिति भवति। तस्मादतिशय

३१ स्पर्शगुणैकनियतत्वात्। सामान्यविशेषतत्वाच सामान्येसंभवादु एणएवस्नेहः॥ किंच। स्निग्धद्रव्यावयवा ३१
रंपरायाअपिस्निग्धत्वात्परमाणुस्नेहःस्यात्। नच परमाणुषु पृथिवीत्वादन्यापरा जातिरस्तियावयवस्थापकात्र
वात्। क्षीरत्वादिवद्भविष्यतीति चेन्न। तस्यापि परमाणुष्वभावात्। पाकजरूपरसस्पर्शविशेषव्यंग्यंहि क्षीर
त्वादि। तथाच पाकान्तरेण तन्निवृत्तौ क्षीरत्वादेर्निवृत्तिप्रसंगात्। नच सत्तया व्यक्तौ सामान्यनिवृत्तिरिष्यते। नच
चिरन्तिनसत्ताकाःसंभवमात्रेणास्या भिव्यंजकाः॥ सर्वपार्थिवपरमाणूनां क्षीरत्वापत्तेः तदारब्धसर्वकार्य
स्य पृथिवीत्ववत् क्षीरत्वापत्तेः। द्व्यणुकादौ क्षीरत्ववद्भविष्यतीत्यपि न। तदारंभकेषु परमाणुषु तदवस्थापकता
क्षीरत्ववद्रूपविशेषस्याभावात्। भावेवा सएवस्नेहः। नह्यतैलावस्थापकत्वे च तद्विशेषास्तेषांघृतत्वादिव्य
वस्थापकत्वात्। नच कारणसामान्यमस्ति तैलघृतवसानां बीजक्षीरमांसादियोनित्वात्। अतएव नारि
केलस्नेहस्यापि तैलत्वं सादृश्यात्‌घृतादिव्यपदेशः॥ तस्मात्परमाणुषु वर्तमानःकारणगुणक्रमेण

त्वावमविपर्यंतमायातोऽपि नाविशेषः स्नेह इतियुक्तम्। नच घृतादिष्वेव स्नेहोपलब्धिः सातिशयोहि स्नेहस्त
त्रोपलभ्यते गुरुत्वमिव सुवर्णेस्वल्पस्तस्य सर्वजलसाधारणी स्निग्धतान्यथा जलावसेके न सक्तु सिक
तादीनां संग्रहोनस्यात्। सहि स्नेहद्रवत्वकारितः संयोगविशेषो धारणाकर्षणहेतुः। नचासौ केवलद्रवत्वहे
तुकः काचकांचनादिभिरतिद्रवीभूतैरपि वालुकाद्यसंग्रहात्। नापि स्नेहमात्रकारितः स्त्यानैर्घृतादिभिर
ग्रहात्। तस्मात्सकलजलहेतुकः संग्रहो भवन्सूत्रद्रवत्वमिव स्नेहमपि सांसिद्धिकमवस्थापयति। तथा
पि नैमित्तिकद्रवत्वमिव नैमित्तिकः पृथिव्यामयं भविष्यति। पार्थिवेष्वपि घृतादिषूपलब्धेरिति चेत्। न। तदन्वयव्य
तिरेकाविनानुविधानात्। नहि यथाजलघृतादिषु द्रवेषु पावकसंपर्कात् द्रवत्वमुत्पद्यते तद्विरोधिसलिलाव
सेकाच्च निवर्तते तथा स्नेहः॥ तस्मात्पाकजतया विगंधरसरूपादिमद्भिःपरमाणुद्व्यणुकादिक्रमेण घृतादिद्र
व्यमारभ्यते। तत्रचोपष्टंभकतयानिमित्ततामापन्नाःपानीयावयवास्तेषां संयुक्तसमवायेन स्नेहस्तत्रो

३२ पलभ्यतइतिस्थितम्। सांसिद्धिकं द्रवत्वमंतस्येवेत्यत्र कर्षणपार्थिवच्छकारः। तैलक्षीरादिषु पार्थिवत्वसिद्धोसंयुक्त
समवायात्तदुपलब्धिः। शैत्यस्नेहवत्। तेषां पार्थिवत्वमेव कथमिति चेत्। तैलस्पर्शेनो मानतो ध्वंसत्वाद्घृतवत्
क्षीरस्य पिंडीभावेपि प्रत्यभिज्ञानात्। घृतवदेवेत्यादिस्वयमूह्यम्। तास्तु पूर्ववदेव द्विविधा नित्या नित्याभावात्तु
शब्दोप्यर्थः। पृथिवीतावद्द्विविधा पोपि द्विविधाः पूर्ववदिति। कार्य्यतयापरमाणुतया चयथा पृथिवी नित्याचा
नित्या च तथैवेत्यर्थः। ताइत्यत्र विभक्तिविपरिणामेन तासां कार्य्यं त्रिविधम्। शरीरेंद्रियविषयसंज्ञकम्। तदेत
स्त्रिगदव्याख्यातम्। पृथिव्याभिधानतात्पर्य्यमूहनीयम्। आपः काचित्छरीरारंभिकाद्व्यारंभकत्वात्। पृ
थिवीवत्। द्रव्यस्य हि द्रव्यारंभणयोग्यता शरीरेंद्रियविषयभावेनव्याप्ता। यदेवंच्छकमप्यारंभतेतदन्यदपिय
थैकं नतदन्यदपीत्यन्वयव्यतिरेकाभ्यामुपलंभात्। ततोयथापःशरीरं नारंभेरन्नेंद्रियविषयावपि नारंभे
रन्। नचैवंतस्मात्कचिच्छरीरमप्यारंभंतइति स्थितं कीदृक्छरीरमित्यपेक्षायामाह। शरीरमयोनिज ३२

कि०रा०मु०

मनो १

मेदेति। अकृशो णितयोनिजं यमेनपार्थिवत्वात्। पार्थिवेन च पाषसीया। नारंभात्तदयोनिजमेव। नन्वनुप
लब्धिबाधितमेतदित्यत आह। वरुणलोकइति। व्यवहितविप्रकृष्टत्वा नो पलम्भः तेनत्वभावात्। आगमादुप
लब्धेरितिभावः। ननु स्वभावद्रवत्वादप्यां तदारब्धं कथमुपभोगाय तनं तदित्याह। पार्थिवेति। यथा कठिनत्वात्पृ
थिव्यास्तदारब्धमाप्याद्यवयवोपष्टंभादुपभोगसमर्थं। तथाप्याप्यत्वाद्द्रवमपि पार्थिवावयवोपष्टंभा
त्तदुपभोगसमर्थं। विजातीयानामारंभकत्वमात्रं हि प्रतिषिद्धं न तु परस्परानुग्रहोपीत्यर्थः। इंद्रियमि
ति। यद्रसोपलब्धिसाधनमिंद्रियं तदाप्यम्। अत्रापि रसोपलब्ध्या स्वरूपसिद्धिः। आप्यत्वं च रूपाद्यव्यं
जकत्वे रसाभिव्यंजकत्वात्। सक्तुरसाभिव्यंजकोदकवत्। प्राणिभेदेनेंद्रियप्रकृतिवैचित्र्यनिवारणाय
सर्वप्राणिनामिति। अन्यावयवानभिभूतैरितिवारब्धमिति नवेलइ जिह्वात्वादिति भावः। किंनामधेयं तदि ना३
त्यत आह। रसनमिति। तृतीयां विधामाह। विषयस्त्विति। आप्यत्वेपि हिमकरकयोः काठिन्यभावोपपत्तिं द्रवत्वं वद
तीति॥ ॥३॥ ॥तत्र सोल्लक्षणमाह। तेजस्त्वाभिसंबंधादिति। व्याख्यानं पूर्ववत्। तस्य द्रवत्वव्याख्यास्थितमे

श्री

प्रसिद्धाद्रूप्य
घ॰३

गुणानाह। रूपस्पर्शेति। अत्र प्रमाणं सूचयति। पूर्ववदिति। तेजो रूपस्पर्शवदिति। सूत्रकारवचनाद्रू
पस्पर्शौ चाक्षुषवचनात् संप्रसरत्वादयः॥ अद्भिः सामान्यवचनाद्द्रवत्वं। उत्तरकर्म्मवचनात् संस्कारः। पृथि
वीवदेतेषां सिद्धिः॥ तेजःस्वव्यवस्थापकान् विशेषानाह। शुक्लं भास्वरं च रूपमिति। चस्त्वर्थः॥ पृथिव्यादिरूपाद्व
यवच्छिनत्ति। भास्वरत्वं सामान्यविशेषः स च रूपान्तरप्रकाशकत्वेन व्यज्य ते। तद्वत्रूपं तैजसमेव तेन भास्वररू
पं तेज इति लक्षणार्थः। शुक्लमिति स्वरूपकथनं। पच्यमाने घनरूपसन्निधिकृतस्तु लोहिताद्युपलंभस्त
द्विरहे चन्द्रतारकादिमहसि शुक्लस्यैवोपलंभादिति प्रतिपादनार्थं। न च तत्राप्यपार्थिवघनतया तोयरूपसंक्रान्त्या
धावल्यप्रतीतिरिति वाच्यम्। अपांरूपेणाविजातीयानभिभवात्। न हि जलज्ञावितानीत्यादयः श्वेतं तद्दृति। उ
ष्णएवस्पर्श इत्येवकारः स्वर्णचामीकरचक्षुरादिष्वनुपलंभे हेतुकाविप्रतिपत्तिमपनेतुं तेषां तैजसत्वेनोष्णत्वादनुभ
नादनुद्भवेनानुपलंभो न त्वभावात्। तदपि द्विविधमिति। पूर्ववत्तात्पर्यं। कार्यभेदमाह। शरीरादित्र

यमिति। शरीरमादिर्यस्य त्रयस्य तत्तथा। न च पार्थिववत्तैजसं शरीरमुपलभ्यत इत्यत आह। शरीरमि
ति। तैजसोऽपि शरीरारम्भकत्वं तोयवत् साधनीयम्। ज्वलदग्निकल्पेनकस्तेनोप। भोगद्युत्पत्तेः। पार्थिवेति। इं
द्रियमाह। इंद्रियमिति। यद्गन्धाद्यव्यंजकत्वे सति रूपस्य व्यंजकमिंद्रियं तत्तैजसं। सर्वप्राणिनामिति। प्राणि
नां भेदेनेंद्रियप्रकृतिवैचित्र्यशंकां निराकरोति। तत्र द्रव्यरूपोपलब्धिः प्रमाणम्। तैजसत्वे च रसाद्यव्यंजकत्व
रूपाभिव्यंजकत्वं प्रदीपवत्। इह केचिदाहुः अप्राप्यकारि चक्षुः अधिष्ठानासंबद्धार्थग्राहित्वात् यत्पुनः प्राप्यका
रि न तदधिष्ठानासंबद्धार्थग्राहि। यथा रसनादि पृथुतरग्रहणाच्च। यदि च प्राप्यकारि चक्षुः स्यात्तदाऽ
धिकपरिमाणं न गृह्णीयात्। न खलु नखरञ्जनिका परस्य चक्षुर्दंकिनति। शाखाचंद्रमसोस्तुल्यकालग्र
हणाच्च। यदि हि गत्वा गृह्णीयात् निकटं स्थानमात्तु प्राप्नुयात्। दवीयस्तु चिरेणेति न तुल्यकालमुपलंभयेत्। अत्रकु
न्नवतीदन्मीलयन्नेव नयने शाखांशीतमयूखं चेति। काचाभ्रपटलस्फटिकाद्यन्तरितोपलंभश्च। यदि हि

रंजिकपा ३

ति॰

३४ शाखाग्रं द्वितीया क्षतिपाति नास्फटिकादिद्रव्येणाविष्टं न्यादप्राप्तं प्रसर्प्यच्चक्षुराणादिकं नास्तीत। तस्मादप्राप्यकारि चक्षुस्त ३४
तो न तैजसमिति। तदसत्। अधिष्ठानासंबद्धार्थग्राहित्वस्य प्रदीपेनानैकांतिकत्वात्। पृथुतरग्रहणस्यापि दृष्टा
गतयापि तद्देवोपपत्तेः। तुल्यकालग्रहणं च सिद्धमेव तदन्निमानस्य कालव्यसन्निकर्षेणोपपत्तेः। अविच्छिन्नो हि तेजसो
लाघवातिशयेन वेगातिशयो यथा चीनांचलचूडावलंबिन्येव मयूखमालिनि नवनोदरे घात्मोक इत्यन्निमानो लौ
किकानां। केचित्तु संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेन एकतां गतं युगपदेव तावदर्थेन संसृष्टमिंद्रिय
मुत्पादितवदिति शाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यत इति समाधानमाहुः। तदसत्। पृष्ठभागव्यवहितार्था
परिच्छेदप्रसंगात्। इंद्रियप्राप्त्येत्याज्जीवावस्थानमप्युपपद्यत इति। स्फटिकाद्यंतरितोपलब्धिरपि प्रसादस्वभावत
यास्फटिकादीनां तेजोगतेरप्रतिबंधकतया प्रदीपवन्नावदेवोपपन्नेति। येषां त्वप्राप्यकारि चक्षुस्तेषामप्राप्तत्वा
विशेषादव्यवहितवत्कुड्यादिव्यवहितमपि किं न गृह्णाति। न हि व्यवधायकं प्राप्तिविघातादन्यत्र सत्वे एव कार्य्यवि
रोधि। तथात्वे तस्मिन्सति कचित्कार्य्यानुत्पत्तेः। योग्यं योग्येन गृह्यते तत्त्वयोग्यत्वान्न गृह्यते। न व्यवहितत्वादित्यपि

वार्त्तं। स्थैर्य्यस्वरूपयोग्यतायास्तदानीमप्यपरावृत्तेः। क्षणिकत्वेपि प्रत्यासीदतां सहकारिणामतिशयजनकत्वा
त्। न हि प्रत्यासीदंतः सहकारिप्रत्ययाः समासहस्रेणापि भावानतिशाययंति। प्रत्यासत्तिश्च बौद्धनये निरंतरोत्पादः॥
अस्माकं च द्रव्ययोः संयोग इति स्यात्। ननु कुड्यसान्तर्य्ये न निरंतरोत्पादो नापि संयोगस्ततस्तदप्रियस्यातीन्द्रियस्य गति
क्रमणानिरंतरोत्पादेन वा संयोगेन न वेत्यवशिष्यते। तदेतदग्रे निरूपयिष्यत इत्येषादिक्। कथमेतदेव तथा न त्वन्यदु
प्पादीत्यत आह। अन्येषूपलक्षणं। समानजातीयेनापि बलवता दुर्बलमभिभूयते। कथमन्यथा सौरेण तेजसा नयनमभि
भिभूतं रूपग्रहणासमर्थं न भवति। चक्षुरिति लोकप्रसिद्धमित्यर्थः। विषय इति संज्ञायस्य तच्चतुर्विधम्। भौमं हि भौममिन्धनं। दि
व्यं दिविन्धनं। उदर्य्यमुदरेन्धनं। आकरजं। स्वनिराकरः। तस्माज्जातं काष्ठेन्धनोद्भिदि कार्पार्थिवानुपलक्ष्यपूति। तदेवं धनंदी
पनं यस्य तत्तथा। रूपमूर्द्ध्वज्वलनमेव स्वभावो यस्य तत्तथा। जातिनिबद्धो धर्म्मः स्वभाव इत्युच्यते। पराधीनतामाह। पचनेदि
पाको विक्लेदनं रूपादिपरावृत्तिः। स्वेदनं वातश्लेष्मणोरपक्रमः। आदिग्रहणाच्छीतदुःखोपशमो दाहदुःखोत्पादनं च।
दिव्यमबिंधनम्। अपवर्वेधनं दीपनं यस्य तत्तथा। किं तदत आह। सौरस्सूरस्येदं सौरं। विद्युत्प्रविरप्रभा। आदिग्रहणात्
न्या॰

कि०मु०टी

३५

वडवानलइत्येतद्दिव्यम्। भुक्तस्याहारस्याक्रियत इत्याहारः उदराग्निस्तस्य रसादिपरिणामनिमित्तस्तदर्थो भुक्त एवा
हारोयस्य पार्थिवाप्यरूपं इंधनम्। काष्ठीयरसः आदिग्रहणान्मलधातुतद्विकारास्त एव परिणामास्तेषां निर्त्तं आरं जं क२
सुवर्णादि। आदिग्रहणाद्रजतताम्रकांस्याद्यष्टकम्। कथं पुनरेतत्तैजसम्। यद्यपि गुरुत्वादयः संयुक्तसमवायेनापुप
पद्यंते तथापि नैमित्तिकद्रवत्वादेव पार्थिवत्वमस्य सिध्यति। घृतादिवत्। न च घृतादिद्रवत्ववदेवात्यंताग्निसंयोगादे
तद्द्रवत्वं नीयते। तथा दर्शनात्। विशेषविरोधस्य चादूषणत्वात्। तथा हि तिलुनेति नियमः। दह्यमानेषु घटादिषु द
र्शनेन ज्वलनसंबंधाद्भवते घृतवद्दृशेन न कार्य्यकारणभावव्यवस्थितेः। तदिदं सुवर्णादि निरंतरं ध्मायमानमपि न पूर्वरू
पं जहाति। न च रूपान्तरमापद्यते। तेन जलवदपार्थिवमेव धार्यते। तेनैव च द्रव्यांतरेणाप्रतिबद्धत्वात्तद्रूपं न कोपि पा ते१
र्थिवो भागः सदृशरूपमेवानुवर्तते। यत्तु पुटपाकादिना रक्तस्य रतादधीर्यते न मिश्रीभूताग्निभावकः तत्तद्व्योपग
मादितिद्रष्टव्यम्। तदयं प्रयोगः। सुवर्णादिनपार्थिवमत्यंताग्निसंयोगेप्यपरावर्तमानरूपत्वात् जलवत्। तैजसंचे
तत्पार्थिवाप्यान्यत्वे सतिरूपवत्वात् प्रदीपालोकवत्। ननु जलस्वरूपत्वान्नैतत्तैजसमित्यपि स्यात्। नास्म
×एतेनपाइदादिव्याख्याते ॥१

दसिद्धेः। न हि मध्याह्ने प्रदीपो बहिर्निःस्वेरणोपलभ्यत इति न भास्वरः। उपलब्धं नकद्रव्यरूपाग्निजन्येनैवानुपलब्धं
नोपपन्नेः। अथ नयनरश्मिवदनुद्भवेनैवानुपलंभः इति किन्न स्यात्। तद्वत्सुवर्णादिद्रव्यस्याप्यनुपलब्धं न प्रसंगात्। न ह्य
नुद्भूतरूपं द्रव्यमुपलभ्यते। ग्रीष्मे ऊष्मणो विनि शिदर्शनप्रसंगात्। अथ नैव मध्यंदिनाधिकप्रकाशानुपलंभवे
दनुपलंभप्रसंगः स्यादिति चेत्। न। न हि रूपस्याग्निजन्येन [illegible] व्यनोपलभ्यते। महारजनरूपाभिभूते एव तस्मिन्पटानु
पलंभप्रसंगात्। तस्मादग्निभूतताद्रूप्यमेव तस्य तत्र दृश्यते। सतु भाषराशिप्रविष्टमपि वन्महाप्रकाशसमाहृ
यानलस्तत इति सर्वमवदातं। कथं तर्हि सुवर्णादेरस्यासाध्युपलब्धिरित्यत आह। तत्रेति। प्रतिनियतेंद्रियग्राह्य ग्राह्य ६
गुणाश्रितया पृथिव्यादीनां सुप्रसिद्धत्वात् पृथ्व्यादिभ्यः सकाशान्मेयाख्यानान्तेजोनंतरं वायुलक्षणमाह। वायुत्वाभि ह४
संबंधादिति। । लक्षणार्थः पूर्ववत्। तस्य द्रव्यत्वसिद्धार्थं गुणानाह। स्पर्शेति। एवं गुणवत्त्याद्द्रव्यत्वे सिद्धे वा
युत्वव्यवस्थाहेतुं विशेषगुणमाह। स्पर्शोस्यति। अस्य वायोरनुष्णाशीतस्पर्श इति तिङ्सो व्याच्हे। आशीत इत्या
अपाकज इति पृथिव्याः। तज्जानुष्णाशीतत्वमस्य [illegible] सिद्धम्। अपाकजत्वं तु पार्थिवस्पर्शात्तैजसस्पर्शवत्। पाकजत्वं हि

३४

प्रतिबंधोव्याप्तिः२ [redacted] दृ पा४ कि०णा०व्ली

ऽणांतरवृत्तावनुपलब्धं अन्यथा सर्वगुणानां पाकजत्वप्रसंगात्। तदितो व्यावर्त्तमानं स्वव्याप्यमुपादाय तदितर २६
२६६ तोपार्थिवविशेषाम्यतीति प्रतिबंधे सिद्धिः सोऽस्ति वायावित्यत्र प्रमाणं सूचयति। गुणविनिवेशेति। तथा च सूत्रं। वायुःस्प
र्शवानिति। संख्यादिषु सूत्रकारसम्मतिमाह। अरूपिष्विति। रूपरहितेषु वर्त्तमानानामेषामचाक्षुषत्वं यद्युतः सूत्रका रंभकत्वं
रेणारूपरहिते वायौ सद्भावः स्वीकृतः। परिमाणं तु संख्यापरिमाणपृथक्त्वसंयोगविभागवत्तायां वायोर्द्रव्यत्वम्। स्व
रव्यापरिमाणपृथक्त्वसंयोगैर्विना द्रव्यत्वानुपपत्तेः। विभागेन विना द्रव्यानुपपत्तौ वारब्धस्य विनाशानुपप संयोगविना ५
त्तेः। परत्वापरत्वाभ्यां विना संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वासंभवे मूर्त्तत्वानुपपत्तेः। संस्कारे सूत्रकारानुमतिमा
ह। तृणेति। तृणकर्म वायुसंयोगादिति वचनादित्यर्थः। तथा च प्रयोगः। एतद्भूपूर्ववत्द्रव्याभिघातमंतरेण तृणकर्म स्प
र्शवद्वेगवत्द्रव्याभिघातजं विशिष्टकर्मत्वान्नदीपूराहतकाशादिकर्मवदिति। तदेतत्कंपलिंग इत्यत्र स्फुटी
भविष्यति। एतेनारूपस्पर्शवान्वायुरिति लक्षणमुक्तं। तथा च सः स्पर्शीतानुष्णापाकजस्पर्शवान्वायुरिति सिद्धति
। सोऽयं यच्च नित्य एवावयववाननवस्थास्यात्। कस्यचिन्नाशे अनाश्रयं च कार्यमापद्येत। अथ नित्य एव तर्हि निःप्रमाण

सूत्रकार२४

कः स्यात्। परमाणुस्पर्शस्यातीन्द्रियत्वात्। स्थूलानां शब्द इति कंपानां परस्परस्पर्शवद्द्रव्याभिघाताद्येहेतुकल्प
दित्यत आह। स चायमिति। द्विविधो नित्यश्चानित्यश्च। यथासंख्यं परमाणुकार्यभावेनेति। तत्र तयोरणुकार्ययोर्म
ध्ये कार्यलक्षणश्चतुर्विधः। चतस्रो विधा दर्शयति। शरीरमिति। तत्र तेषु मध्ये शरीरमयोनिजमेव तदुपाधि
वद्यानिजमपि। वायोर्दुष्पारं नरकत्वेन तेजोव शरीरं नरकत्वे स्थिते। तत्तदित्यपेक्षायामाह। मरुतां लोक
इति। ननु तस्य तात्त्वाद्य भोगे वा कुव्यवहाराभावात्करचरणाद्यभावे चाहारविहाराद्यभावात् संस्थानवि
शेषाभावे चेन्द्रियाश्रयत्वानुपपत्तेः। कथं भोगायतनत्वमित्यत आह। पार्थिवेति। उपलक्षणं चैतत्। भूतांतरा
नुग्रहस्यापि संभवात्। इंद्रियमिति। रूपादिषु मध्ये स्पर्शोपलंभकं यदिंद्रियं तद्वायवीयं सर्वप्राणिनामिति
पूर्ववत्। अत्रापि स्पर्शोपलब्धिः करणमात्रे सिद्धे संयोगाश्रयतया च द्रव्यत्वे रूपादिषु मध्ये स्पर्शस्यैव व्यंज
कत्वाद् वायवीयत्वमंगसंगिसलिलशैत्याभिव्यंजकव्यजनवातवदित्यूहनीयम्। कस्यचिदेव वायोरि
न्द्रियत्वं न सर्वस्येति नियमहेतुमाह। रूपेत्यादीति। अतएव कुष्ठाद्युपहतायां त्वचि न स्पर्शोपलंभ इत्यभिसंधिः।।

माह१

३७ तस्याधिष्ठानं सर्वशरीरव्यापि सर्वशरीरव्यापस्य स्पर्शस्योपलंभादित्यवधातव्यं। तदवसानं च शरीरं न खलो ३७
मकेशदशनादीनां संयोगिव्यमा। अतस्त्वं त्वगिंद्रियाश्रयत्वादित्यभिप्रायः। तस्य लोकप्रसिद्धां संज्ञामाह। त्वगिति। न
नुद्भूतस्पर्शवद्द्रव्यसहकृतावरणमात्रं त्वगित्युच्यते। तच्च पार्थिवं प्रत्यक्षसिद्धं नेंद्रियं न च वायवीयमित्यत आ
हा। इंद्रियं न त्वगेव मुख्यते। वायवीयमिंद्रियं त्वगित्युच्यते। किं तल्लक्षणया तत्रस्थमिंद्रियं त्वगिति व्यव
ह्रियते लोके नेत्यर्थः। विषयस्त्विति। तुशब्देनोपलभ्यमानात् पृथिव्यादित्रयाद्व्यावर्त्तयति। उपलभ्यमानस्प
र्शस्याधिष्ठानभूतो न तूपलभ्यत इत्यर्थः। नन्वनुपपन्नमेतत्। स्पार्शनप्रत्यक्षत्वाद्वायोस्त्वगिंद्रियव्यापा
रान्तरं वायुर्वातीति प्रतीतिः। न च स्पर्शमात्रमेवात्र प्रतीयते वायुस्त्वनुमीयत इति युक्तम्। शीतो वायू रूक्षो वायु
विति तदीयस्पर्शाभिन्नत्वेपि वायुप्रत्ययात्। न च शीतोष्णाद्युपनायकत्वेनानुमितस्य पवनस्य तथा [illegible] प्र
तीतिरिति युक्तम्। बाधकाभावात्। अचाक्षुषत्वं द्रव्यस्य हि स्पार्शनत्वेन चाक्षुषत्वेन व्याप्तं तदिति व्याव
र्त्तमानं स्पार्शनत्वमपि व्यावर्त्तयतीति चेत्। न। विपक्षे बाधकाभावात्। न हि च स्त्वसा चाक्षुषत्वं च स्पर्शस्य वा

अप्रसि प्रत्यक्ष २

लं२ न३

किं विदुषः कर्त्तव्यं येन मिथ्योपेक्ष्यं स्यात्। तथात्वे वा ज्ञातं चेन्न घटादयोपि त्वचानोपलभ्येरन् रूपाभावेन द्रव्यवत्स्प
शीषिता नोपलभ्येत। उक्तं तत्र शीतं शिलातलमित्यत्रोक्तशीतस्पर्शाधिष्ठानयोस्तेजः पयसोश्चक्षुषानुपलंभेपि
स्पर्शस्योपलब्धेः। द्रव्यस्य चक्षुषानुपलभ्यमानस्य स्पर्शनेन क्वचिदप्यनुपलंभान्नैवमिति चेत्। अपार्थिवे सर्वत्र तर्हि
त्वचा स्पर्शमात्रोपलब्धिरस्तु द्रव्योपलब्धिस्तु चक्षुषैव क्वचिदनुमानेन वायुवद्भविष्यति। प्रत्यभिज्ञानमपि तद्वदे
वोपपत्स्यते। अथ यैतोयथातथास्तु प्रमाणचिंतायां तूपलभ्यमानस्पर्शाश्रयस्य हित एवोपलभ्यते। अनुन्न
वस्य दुरपह्नवत्वादतद्भोयत जसा त्वचोपलंभ इष्यते। गुणायोग्यतामाश्रित्य त्वक्चक्षुषी इंद्रियावगाहनादिति यदि
वायावपि समानमेतत्। तथा च प्रयोगः। वायुः प्रत्यक्षः उपलभ्यमानस्पर्शाधिष्ठानत्वाद्घटवदिति। अत्रोच्यते। द्रव्य
ग्रहणायोग्यतान्तरं त्वग्योग्यता कानि खलु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वकर्माणि। एव
ममीषांद्वींद्रियग्राह्यता निर्वहति। तद्यदि त्वचा वायुरुपलभ्येत तत्संख्यादयोप्युपलभ्येरन्। न च तद्द्रव्यमपि नोपल

हे०प्र०ली

स्या६

माह१

३७ तस्याधिष्ठानं सर्वशरीरव्यापि सर्वशरीरस्य प्रत्यक्षस्पर्शस्योपलंभादित्यव गंतव्यं। तदवसानं च शरीरं न तु नखलो ३७
मकेशदशनादीनां संयोगिव्यमात्रं त्वगिंद्रियाश्रयत्वादित्यभिप्रायः॥ तस्य लोकप्रसिद्धां संज्ञामाह। त्वगिति। न
नु चक्षुरादिवत् त्वक्सह ... तावत्स्पर्शमात्रत्वगित्युच्यते। तच्च पार्थिवं प्रत्यक्षसिद्धं न इंद्रियं न च वायवीयमित्यत आ
ह। इंद्रियं त्वगेव मुख्यते वायवीयमिंद्रियं त्वगित्युच्यते। किं तल्लक्षणया तत्रस्थमिंद्रियं त्वगिति व्यव
ह्रियते लोके नेत्यर्थः॥ विषयस्त्विति। तु शब्देनोपलभ्यमानात् पृथिव्यादित्रयाद्व्यावर्त्तयति। उपलभ्यमानस्प
र्शस्याधिष्ठानभूतो न तूपलभ्यत इत्यर्थः॥ नन्वनुपपन्नमेतत्। स्पर्शनप्रत्यक्षत्वाद्वायोस्त्वगिंद्रियव्यापा
रान्वयव्यतिरेकाद्वायुर्वातीति प्रतीतिः॥ न च स्पर्शमात्रमेव तत्र प्रतीयते वायुस्त्वनुमीयत इति युक्तम्। शीतो वायुरुष्णो वायु
रिति तदीयस्पर्शाभिन्नत्वे पि वायुप्रत्ययात्। न च शीतोष्णद्रव्योपनायकत्वेनानुमितस्य पवनस्य तथा प्र
तीतिरिति युक्तम्। बाधकाभावात्। अचाक्षुषत्वं द्रव्यस्य हि स्पार्शनत्वे न बाधकं चाक्षुषत्वे न व्याप्यं तदिति व्याव
र्त्तमानं स्पार्शनत्वमपि व्यावर्त्तयतीति चेत्। न। विपक्षे बाधकाभावात् न हि चक्षुरसान्निध्यं त्वचस्पर्शस्य वा

अभ्रिा प्रत्येक२

लं२ न३

किं विदुत्कर्षविशेषेण मिथोपेक्षा स्यात्। तथा लेवा ज्ञानं येन घटादयोपि त्वचा नोपलभ्येरन् रूपाभावेन द्रव्यवत्स
र्शिपिता नोपलभ्येत। उत्तप्तत्वं शीतं शिलातलमित्यत्रोष्णशीतस्पर्शाधिष्ठानयोस्तेजः पयसोश्चक्षुषानुपलंभेपि
स्पर्शस्योपलब्धेः॥ द्रव्यस्य चक्षुषानुपलभ्यमानस्य स्पर्शनेन क्वचिदप्यनुपलम्भान्नैवमिति चेत्। अपार्थिवे सर्वत्र तर्हि
त्वचा स्पर्शमात्रोपलब्धिरस्तु द्रव्योपलब्धिस्तु चक्षुषैव क्वचिदनुमानेन वायुवद्भविष्यति। प्रत्यभिज्ञानमपि तद्वदे
वोपपत्स्यते। अथ शीतो यथा तथास्तु प्रमाणचिंतायां तूपलभ्यमानस्पर्शाश्रयस हित एवोपलभ्यते। अनुद्भू
तस्य दुरपह्नवत्वात् तद्धोयते जसा स्वचोपलभ इष्यते। गुणायोग्यतामाश्रित्य त्वक्दूषो ई व्यावगाहनादिति यदि
वायावप्यसमानमेतत्। तथा च प्रयोगः॥ वायुः प्रत्यक्षः उपलभ्यमानस्पर्शाधिष्ठानत्वाद्घटवदिति। अत्रोच्यते। द्रव्य
ग्रहणायोग्यतान्तरीतया स्मृता कानि खलु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वकर्माणि। एव
लमीषां इंद्रियग्राह्यता निर्वहति। तद्यदि त्वचा वायुरुपलभ्येत तत्संख्यादयोप्युपलभ्येरन्। न चेत् द्रव्यमपि नोपल

३८ ग्यते। तुल्योपलंभनयोग्यत्वात् न च त्वचा वायोरेकत्वादिका संख्या वा रूक्षवितस्त्यादिपरिमाणं वा पृथिव्यादिष्व ३८
सजातीयतो वा पृथक्त्वं संयोगविभागौ वा परत्वापरत्वे वा कर्म्म चोपलभ्यते। तुल्योपलंभनयोग्यते वा सिद्धा दू
म रात्संख्यादीनामनुपलंभेपि शालतमालादीनामुपलंभादिति चेत्। न। दूरादिदोषेण संख्यादयो नोपलभ्यंते तथ
पि योग्यताया अनिवृत्तेः दोषनिवृत्तौ तूपलंभात्। तस्माद्द्रव्योपलंभनसहचरोपलंभनयोग्यतानां संख्यादीनां स
र्वेषामनुपलंभादवगम्यमानस्पर्शनः पवन इति। तदेतस्याप्रत्यक्षस्यापि नानात्वं संमूर्छनेनानुमीयत इ
त्यत्र स्फुटीभविष्यति। अत एवानुपलभ्यमानसंख्यादिके तोयतेजसी अपि चानोपलभ्येते इति विनिश्चयस
घ्वोपलभ्यमानस्पर्शाधिष्ठानत्वमप्यनैकांतिकमिति सिद्धम्। कुतस्तर्हि प्रत्येतव्य इत्यत आह। स्पर्शेति।
स्पर्शः शब्दो धृतिः कंपश्च लिंगानि यस्य स तथोक्तः। तथाहि योयं रूपवद्द्रव्यासमवेतः स्पर्शः स क्वचिदाश्रितः स्प
र्शत्वात् पृथिवीस्पर्शवत्। न चायं जलानलयोरनुष्णाशीतत्वात्। न च पार्थिवो रूपेणासमानाधिकरणत्वात्। य

दा।
रूपपार्थिवो नासावेवं पार्थिवादिस्पर्शः न च रूपेणासमानाधिकरणत्वमसिद्धं योग्यानुपलब्धेः। न चायोग्या निभूतं
रूपमिह भविष्यतीति युक्तम्। अभिभावकस्य रूपांतरस्यानुपलब्धेरभिभवानुपपत्तेः। पाकजत्वेन पार्थिवरूपस्पर्श
योस्तुल्ययोगक्षेमत्वेन स्पर्शस्योद्भवे रूपस्यानुद्भवायोगात्। अन्यथा पृथिव्यां रूपोद्भवेपि स्पर्शानुद्भवप्रसंगात्। कि
स्प ञ्च। अनुपलभ्यमानरूपैः स्पर्शाधिष्ठानस्य पृथिवीत्वे गुरुत्वमपि स्यात्। न च पवनापूरितस्य चर्म्मपुटकादेरप्र
रणदशातोधिकमवनमनमनुमीयमानस्य। धूमापूरिते नैवमनैकांतिकमिति चेत्। न। अत्र धूमदशायां तत्रापि ग
रिमविशेषहेतोरवनतिविशेषस्य प्रतीतेः। तस्माद्विवादाध्यासितं द्रव्यं न पृथिवी रूपरहितत्वादाकाशवत्। अगुरुत्वा
त्तेजो न दिति स्थिते स्पर्शाश्रयतया चतुर्थं द्रव्यं सिध्यतीति। एवमसति रूपवद्द्रव्याभिघाते योयं पर्णादिषु शब्दसं
तानः स स्पर्शवद्वेगवद्द्रव्यप्रभवः अविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वाद्दंडादिहतभेरीशब्दसंता
नवदिति। एवं गुणोद्द्रव्यस्यापतनं धृतिः। ततोप्यनुमीयते वायुः। तथाहि प्रयोगः। न जलिलपालनलस्तनयित्नुवि
नै५

निरुपाधिः२

मानादीनां धृतिः स्पर्शवद्द्रव्यसंयोगहेतुका। अस्मदाद्यप्रयत्नाधिष्ठितद्रव्यधृतित्वान्नौकादिधृतिवत्। कंपस्यति
कृत्वमुक्तं। एतेषां चतुर्णामपि कार्यत्वान्निःस्पर्शद्रव्यः प्रतिबंधः। तिर्यग्गमनस्वभावो यस्य स तथोक्तः। अदृष्टवदा
त्मसंयोगनिबंधनमस्य तिर्यग्गमनं तेन कः पुरुषार्थ इत्यत आह। मेघादीति। आदिग्रहणाद्विहायसानां विमा
नादीनां भौमानां च यानपात्रपांशुपटलादीनां जलयानलयोश्च परिग्रहः। धारणादीत्यादिशब्देन स्पर्शा
भिव्यक्तिदीपनयोः परिग्रहः। तेषु समर्थः। तस्याप्रत्यक्षस्यापीति। यद्यपि परमाणूनामतीन्द्रियत्वात्स्पर्शस्य
प्रत्यक्षासिद्धत्वादवयविद्रव्यं विहाय संयुक्तसिद्धेः वयविनश्च स्थूलस्य द्व्यणुकादिप्रक्रमेणारंभात्पवनजातीयस्य
नानात्वं धर्मिग्राहकप्रमाणादेव सिद्धं शक्यं च ते च स्पर्शवत्त्वानुमानं। तथापि शिष्यबुद्धिव्युत्पादनाय पंचो
पायानां निराकरणाय नानात्वानुमानप्रपंचमाह। तस्येति। अथ किमिदं संमूर्छनं नामेत्यत आह। संमू
र्छनमिति। समानजवयोस्तुल्यवेगयो विरुद्धादिक्रिययोर्दिशोः क्रिययोस्तयोः संनिपातो मेलकः संयोग
विरुद्धयोः१ ये
च

ऊर्द्ध्वगमनमितिशेषः५

विशेष इति यावत्। वाय्वो रिति प्रकृतत्वेन स्पर्शवतो रिति तु विवक्षितम्। नन्वतीन्द्रियस्य नानात्ववद् गसंयोगाव
प्यतीन्द्रियावित्यत आह। सोपीति। सन्निपातोपीत्यर्थः। ऊर्द्ध्वगमनेनानुमीयते। नन्वतीन्द्रियस्य गमनमप्यतीन्द्रि
यं तत्कथं तेन संनिपातोनुमेय इत्यत आह। अनुमितेन। अयमर्थः केन लिंगेनैतदनुमेयमत आह। तृणादिगमनेन
अत्राप्यूर्द्ध्वमित्यनुषंजनीयं। तेनायं तृणादीनामूर्द्ध्वगमनेन कार्येण प्रत्यक्षसिद्धेन कारणमूर्द्ध्वगमनं पवनस्या
नुमेयं। न चैतद्द्व्यणुकरूपस्य वायोस्तृणाद्यूर्द्ध्वनयनेनानुमुत्सहत इत्यत आह। सावयविनो रिति। अवयवानामवयवि
नस्तृणादिप्रेरणोपपत्ति कमहत्त्वमपेक्षितं। एवमियता प्रबंधेन संस्कारादीनां कर्मपर्यंतानां वायावती
न्द्रियत्वमुक्तं। तिर्यग्गमनस्वभावस्य कथमूर्द्ध्वगमनमित्यत्रोपपत्तिर्दर्शिता। तथा च वायुतोप्यधिकमूर्द्ध्वगति
शीलेंद्धव्यान्तरनाशकनीयमिति सूचितं। निम्नाभिसर्पणस्वभावानामप्यपां यथा द्रव्यान्तरसंमूर्छनादूर्द्ध्वग
मनं तथैव पवनस्याप्यूर्द्ध्वगमनोपपत्तिरिति। अत्रैवं प्रयोगः। प्रतिवात्यावायोः प्रतिहंता वायुरन्यः। तत्र तिहन्तृत्वात्

कि०ण०ली

४० देवदत्ताद्यङ्गदत्तवत् । अन्यदेशप्रतिघातानुपपत्तिः । संयोगस्य द्विष्ठत्वात् । प्रतिरुध्यते चायं वायुः । तिर्य्यग्गमनस्य चाव ४०
स्य प्रयत्नाद्यसद्भावे सत्यूर्द्ध्वगमनवत्त्वात् । परस्पराभिहततदीपयः पूरवत् । अन्यथा निमित्तान्तरासंभवे कारणं
विना कार्य्योत्पत्तिप्रसंगः । ऊर्द्ध्वगतिमानयं तृणादीनामूर्द्ध्वगमनासमवायिकारणसंयोगाश्रयत्वात् । तृणाद्यू
र्द्ध्वगमनासमवायिकारणसंयोगाश्रय ज्वलदनलवत् । पूर्वरूपवत्तर्क्कः । तृणादीनामूर्द्ध्वगमनं स्पर्शवद्वेग
वद्द्रव्यसंयोगजं । अनूर्द्ध्वगमनशीलस्य प्रयत्नाद्यसम्भवे सत्यूर्द्ध्वगमनत्वात् । ज्वलत्पावकप्रेरितद्रव्याद्यूर्द्ध्व
गमनवदिति । चतुर्थीं विधामाह । प्राणोन्तः शरीरे । शरीरान्तरचारी वायुः प्राण इत्युच्यत इत्यर्थः । तत्किंस्य म६
न्नभेदाद्वायं विषयात्किन्नोच्यते तदुत्पत्त्याह । रसेति । अशितपीतस्याहारस्य सारो विकारो रसः । मलास्तत्र
पुरीषस्वेदादयः । पित्तदपः । धातवो रुधिरादयः । अनुक्रान्ताः । उपलक्षणं चैतत् । दोषौ च पित्तकफौ । उदर्य्यस्त्वग्निः ।
तेषां प्रेरणामितस्ततो नयनं । आदिग्रहणाद्धारणं विकारः । अथ तेषां हेतुः । एतेन विषयादसाधारणो ह्ययमिति

यान्नेदो दर्शितः । मूर्त्तत्वसमानदेशत्वयोर्विरोधान्नियाः शारीराः पंच वायव इत्यागमप्रसिद्धिमन्यथासम्भा
र्थयति । एकः सन्निति । क्रियाभेदादिति । एक एव प्राणः कार्य्यभेदात्पंच संज्ञां लभते न तु संज्ञाभेदात्संज्ञी भिद्यत
इत्यर्थः । मुखनासिकाभ्यां निःक्रमणप्रवेशनमाहारे । तेषामेव मलादीनामधोनयनादपानः । समन्तान्नयना
त्समानः । ऊर्द्ध्वनयनादुदानः । नाडीमुखेषु वितननाद्व्यान इति । एतेभ्यः पृथिव्यादयः शरीरेन्द्रियविषयानारम्भ
णाः किमविच्छेदेनाहोस्विद्विच्छेदोप्यस्ति यदापि विच्छेदेनारभन्ते तदापि किमेत एव किं वाऽदृष्टमप्यपेक्षन्ते । य
म५ दाप्यदृष्टमपेक्षन्ते तदापि किं नधिष्ठिताः किं वा केनाप्यधिष्ठिता इति । कश्चात्र विशेषः । अविच्छेदे तद्वचनादाम्ना
यस्य प्रामाण्यमिति व्याकुप्येत । लोकसंतत्यविच्छेदे वेदसंप्रदायस्याप्यविच्छेदात् । विच्छेदे चाद्यव्यवहारस्यु
त्पत्त्यनुपपत्तौ सर्वव्यवहारविलोपप्रसंगो मूलाभावात् । एतत्पक्षे वैचित्र्यानुपपत्तिः । तेषां साधारणा
त्वात् । अदृष्टापेक्षायां सर्वदा वृत्तिनिरोधे कार्य्यानुत्पत्तिप्रसंगः । अदृष्टानां धर्माधर्मवृत्तित्वाच्चेत्कारणाभावात् । अन
धिष्ठितानामिव प्रवृत्तावचेतन्यानुपपत्तिः । प्रवृत्त्यनुपपत्तिर्वा । चेतनस्य प्रवृत्तेः । पराधिष्ठानकार्य्यत्वे नियमात् । अ

प३ घ२

सृष्टएकुपंलवः प्रोक्तो निमेषस्तु लवद्वयम्·अष्टादश। निमेषैस्तु ४

४१ ष्ठित्वंचनास्मदादीनामुपादानाद्यनभिज्ञत्वात्।नेतरस्यप्रयोजनाभावादिति समाकुलितानन्तेवासि ४१
नःसमाश्वासयन्नाह।चतुर्भिरिति।सृष्टिसंहारयोःसर्गप्रलययोर्द्विधःप्रकारः।द्व्यणुकादिप्रक्रमेण।सृष्टिः
क्रियाविभागादिन्यायेनपरमाणवंतः प्रलयइतिकथ्यते।सृष्टिसंहारयोरनादिप्रवाहतांप्रतिपादयितुंसृष्टि
क्रममनुक्रम्यसंहारक्रमेणव्युत्पादयति।ब्राह्मेति। [illegible] काष्ठात्रिंशत्तुताःकला।त्रिंशत्क
लोमुहूर्तःस्यात्त्रिंशताअत्यहर्निशंतु।१अहोरात्राःपंचदशपक्षेमासस्तुतावुभौ।ऋतुर्मासद्वयंप्रोक्तमयनं
तुऋतुत्रयं।२अयनद्वितयंवर्षोमानुषोयमुदाहृतः।एषदेवस्याहोरात्रस्तैःपूर्वादिस्त्रपूर्ववत्।३देववर्ष
सहस्राणिद्वादशैवचतुर्युगं।चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते।४।ब्राह्मेरात्रावतीतस्यपतान्यांप्रकृत्यादि
कल्पना।तथावर्षशतैस्तुवर्तमानस्यब्रह्मणोऽपवर्गकालेमोक्षकालेयसंकल्पितफलकर्मकर्तारःशा
कारोपासकावासितचेतसोयतयस्तेहिरण्यगर्भपदवीप्राप्यापदंज्योतिर्भूयागमात्।यदाजीवस्रएवकार्य

स्या२ ब्रह्मणो२

कि०गा०ली

कि०गा०ली

४२ ष्टेनप्रतिबंधेसति।महेश्वरेच्छात्मागुसंयोगजकर्मजन्यइति।महेश्वरेच्छासहिताआत्माणुसंयोगास्तेभ्यो ४२
जाताविकर्माणितियानितेभ्यःशरीरेन्द्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौशरीरेन्द्रियमूल परमाणु
संयोगनिवृत्तौतेषांशरीरेन्द्रियाणामापरमाणवंतोविनाशः।यद्यपिपरमाणवंतइतिवक्तुमुचितंतथाप्यतःशस्या द्व२
वयववचनत्वभ्रमनिरासेनपरमाणूनामवधित्वमाविष्कर्तुमापरमाणवंतइत्युक्तम्।तेनैतदुक्तंभवति।ताव
दयंविनाशोयावत्परमाणावीवसानमिति।नतुयथाद्वदंशाल्लःपटइतितथातेनैवप्रकारेणमहेश्वरेच्छादिनाप्र
थिव्युदकज्वलनपवनानामपिमहाभूतानामनेनैवक्रमेणक्रियाविभागादिनाउत्तरस्मिन्नुत्तरस्मिन्सतिपूर्व
स्यपूर्वस्यविनाशः।जलादौसतिपार्थिवस्यमहाभूतस्यज्वलनादौसतिजलस्येत्यादि।अयंचक्रमविशेष
निश्चयश्चागमादनुसर्त्तव्यः।एवमापरमाणवंतोविनाशइतिवचनादेवपरमाणूनामवस्थानेप्रतिगते सांख्या दि२
दिमतनिरासायपुनस्तदवस्थानमाह।ततइति।तदेत्यर्थः।प्रविभक्ताःकार्यद्रव्यरहिताःप्रचयाख्यसंयोगरहिताश्चे

पादिते२

निस्ट ५ एवंसंहारक्रमंव्युत्पाद्य स्टष्टिक्रमं प्रतिपादय आह ५

त्यर्थः तत्किमेत एतावति ध्वंते। नेत्युच्यते। किंतर्हि धर्माधर्माः संस्कारश्च नावनाख्याः तेहि विद्याः संबद्धात्मा
त्मानः उपलक्षणं चैतत्। अन्योपि नित्यवर्गः अनित्येषु परिपाकजादयो गुणाः कालावच्छेदोपाधितया वर्तमाना निचम
हान्तूतसंक्षोनप्रभववेगजानिचकर्म्माणि सन्त्यमानान्यवतिष्ठंते। अन्यथा कालावच्छेदानुपपत्तेः पुनः स
र्गानुपपत्तेः। तदिदमुक्तम्। तावन्तमेव कालमिति। ब्राह्मेणमानेन वर्षशतांतं यावदित्यर्थः। ततस्तदनंतरं। पुनरित्य
भ्यासमाह। तेनसर्गप्रलययोरनादितामभिव्यनक्ति। अथ किमर्थं पुनर्भगवान्सृजति इत्यत आह। प्राणिनांभो
गन्तूतय इति प्राणासंबध्यो ग्यानांसंसारिणामितियावत्। भोगस्य स्वसमवेतसुखदुःखानुभवस्य निष्पत्तये। म
हेश्वरस्यासिस्टक्षायास्सर्जने छायाअनन्तरं सर्वेषात्मसु संसारिषु गताः समवेताश्चते वृत्तिलब्धाः लब्धवृत्त
यश्चये अदृष्टास्तदपेक्षेभ्य स्तत्संयोगेभ्यः पवनपरमाणुषु कर्म्माणि तैः संयातेषां पवनपरमाणूनां
परस्परसंयोगेभ्यो द्व्यणुकमादिर्यस्य क्रमस्य तेन महान्वायुः समुत्पन्नो नभस्याकाशे दोधूयमानो
र्धं कंपमानस्तिष्ठति। अंतरस्यान्तुल्यवेगद्रव्यप्रतिघातत्वात्। पवनजातिनियतत्वाच्च तिर्य्यग्गमनस्वनावस्य। तदनंतरंपव

अदृष्टविज्ञाना:

ई

वशाद्गृहीतदेहो ब्रह्मा ध्रुवस्थामापद्यते इति पञ्चस्तदा ब्रह्मलोकापवर्गकाले देहापवर्गकाले व्याख्येयम्
तस्यात्यंतदुःखानावत्तो नित्यमुक्तत्वादिति। संसारे जननमरणप्रबन्धान्धकारे खिन्नानां नानाविधैर्दुःखै
र्नि सर्वभूतानां निशीव निशि प्रलयेपि आमाद्य किंपतं कालदुःखोपशमार्थं सकलभुवनपतेः कालाग्नि
प्र४ रुद्रादिपारमेश्वर्यंतानां भुवनानां पत्युः स्वामिनोयथेष्टविनियोक्तुरितियावत्। अत एव महेश्वरस्य। अन्येपी
श्वराजगदेकदेशपतय इंद्रयमवरुणादयः। स पुनर्कृत्स्नस्यैव जगतः। अतो महानीश्वरः। तस्य संजिहीर्षास
मकालं संहरणेच्छानंतरकालं यद्यपि भगवत इच्छास्ति त्येव सा कारायेकैव तथाप्युपाधिभेदात्संजिही
र्षा चिकीर्षेत्यादिरुच्यते। उत्पत्तिरपि तस्या उपाध्युत्पत्तिरेव सा चकालविशेषो वर्षशतान्तादिशब्दवाच्यः। श
महा२ रीरेन्द्रियमहाभूतोपनिबंधकानामुत्पत्तिस्थितिहेतूनां परमाणुभ्यो घिकपरिमाणतयोपचयासा द्व्यणुकमपि भूता
भूतमुक्तं। सर्वात्मगतानां सर्वेष्वात्मसु समवेतानामदृष्टानां स्वर्गहेतूनामिति शेषः। वृत्तिनिरोधेसति प्रलयहेतुनाद्

प्रलयसामग्रीसं बलनसंडिहिर्षा

४ तेनैव द्व्यणुकादिना प्रक्रमेण महांस्तेजोराशिः समुत्पन्नस्तिष्ठति।४

४३ नोत्सहते। तदनन्तरं तस्मिन्नेव पवने स्पर्शवद्वेगवत्तया गुरुत्वप्रतिबन्धकत्वादाधारत्वं तदूत्यर्थः। आप्येभ्यः परमाणुभ्यः ४३
मार स्तेनैव द्व्यणुकादिप्रक्रमेण महान् सलिलनिधिरुत्पन्नो ऽत्र संप्लवमानस्तिष्ठति। पवनेन वेगात्। तदनन्तरं सलिल
निधेरुत्पत्त्यनन्तरं तस्मिन्नेव महोदधौ पार्थिवेभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिप्रक्रमेण महापृथिवी सं
हती प्राथम्यात् संपूर्णतया। संहतानि विडावयवा विशीर्णतया। तदनन्तरं पृथिव्युत्पत्तेरनन्तरं तैजसेभ्यः परमाणुभ्यो ×
अन ऽग्निवादतिशयेन दीप्यमानः। एवमनेन क्रमेणाग्निध्यानसंकल्पस्तन्मात्रानुकुल्यात् आदिवत्कार्यव्या
पारादित्यर्थः। तैजसानां परमाणूनां पार्थिवाणुसाहित्येनाण्डस्य हिरण्मयत्वं विवक्षितम्। तस्मिन्नण्डे चतुर्वद
नानि कमलानीव प्रसूतं सर्वेषां लोकानां पितामहं शरीरिणामाद्यं ब्रह्माणं सकलभुवनसहितं सकलेश्व
स्तेनैः सुतत्वादिनिरूपिते स्तेनेश्वरेणैव स्वयादिभिर्लोकैः सहितमुत्पाद्य प्रजासर्गे नियुङ्क्ते। तमेवं कुर्वीति स चेति
च समुच्चये। द्विकर्तृकेषु कार्येषु महेश्वरस्यापि कर्तृत्वात्। न च महेश्वरे कर्तरि किं ब्रह्मणेति वाच्यम्। श
रीरिणोऽव्यवहितेरकानुविधायि कार्येण तस्याप्याकृष्यमाणत्वात्। अतिशयेन ज्ञानवैराग्यैश्वर्यसंपन्नः। यद्य
ऽच

वैराग्यवान्न भवेत्कर्माणि नानुरूपं स्यात्।

ष्य
ज्ञः स्यात्तन्न यथापि न कुर्यात्। यदि रागवान्न भवेत् कर्म्माननुरूपं स्यात्। तथा च प्राणिनां कृतहानिरकृताभ्यागमश्च
स्यात्। यद्यनीश्वरो भवेत् ज्ञानतोऽप्यस्यापेक्षितं न सिध्येत्। यतस्त्रितयसंपन्नस्ततः प्राणिनां यानि कर्म्माणि
तेषां विविधपाकं विदित्वा सुतान्निर्मिते कर्मभिः संबध्यते। मानसानिति। चायोनिजान् प्रजापतीन् दक्षादीन् म
नून् स्वायंभुवप्रभृतीन् देवानादित्यादीन् ऋषीन् गौतमनारदादीन् पितॄन् कव्यवालादीन् गणान् कूष्माण्डा
दीन् गणांश्च प्रत्येकं चाग्निसंबध्यते। तत्र प्रजापतयस्तत्तत्प्रतिनियतप्रजास्रष्टारः। मनवो राजधर्म्मप्रवर्तयितारः। दे
वा हविर्भोगभोक्तारः। ऋषयः प्रथमवेदाध्येतारः। पितरः स्वधाभागाधिकारिणः। गणा बलिभागिनः। मुखेति। मुखा
द्ब्राह्मणं बाहुभ्यां राजन्यम्। ऊरुभ्यां वैश्यं। पद्भ्यां शूद्रं। अन्यानि च तिर्य्यङ्मारकिप्रभृतीनि उच्चावचान्युत्कृ
ष्टान्यपकृष्टान्यपि। आशयानुरूपैरिति। फलज्ञानपर्यन्तमाशेरत इति आशयाः कर्म्मज्ञानवासनास्तदनुरूपैस्त
त्संदेशे धर्म्मज्ञानवैराग्यैश्वर्यैरिष्टुपैश्चर्णाम्। अधर्म्माज्ञानावैराग्यानैश्वर्यैस्तत्फलैर्दुःखादिभिः सुखादिभिः सम्प्रयो
ज्य

४४ जयति। यदा त्वीश्वर एव कार्यवशात् शरीरादि शरीरमुत्पादयन् तदधिष्ठानः तदा नियोगः कायवाङ्मनो व्यापारसिद्धे ४४
तद्द्वारेण प्रयत्नवत्संयोगलक्षणं। मुखेत्यादिना ब्राह्मणत्वादिजातिव्यञ्जकव्यक्तिविशेषनिमित्ततत्तददृष्टोपनिब
द्धत्वं तद्भेदप्रतिपादनं तदेवमियता प्रबन्धेन प्रलयविधिं तावद्दृष्टापदेशे। परार्थप्रवृत्तेन परमेश्वरेणाधिष्ठितैः
हम्रू५ पृथिव्यादिभिर्निर्विश्वमारभ्यत इति वदता सर्वे पूर्वपक्षाः परिहृता बोद्धव्याः तथा हि विधौ तद्वचनादाम्नाय
प्रामाण्यमप्रत्यूहं तत। मानसमन्वादिस्मृत्या चाद्यव्यवहारमुपपादयेत्। अदृष्टापेक्षया वैचित्र्यं समर्थ
येत। परार्थप्रवृत्त्या च निष्प्रयोजनत्वशङ्कामुत्सारयेत्। परमेश्वराधिष्ठानेनाचेतन्यप्रवृत्तिनियमोऽपि च चैत्य-घ५
भिद्र समञ्जसयेदिति। स्यादेतत् सर्वमीश्वरसद्भावसिद्धौ संभवेत्। तत्सिद्धावेव किं प्रमाणमिति चेत्। तदुक्तं क्वेपि किं चत्ति ८
चिदुच्यते। शरीरानपेक्षोत्पत्तिकं बुद्धिमत्पूर्वकं कारणवत्त्वात्। यत्कारणवत् तत्तत् बुद्धिमत्पूर्वकं यथा
रथादि। तथा चेदं तस्माद्बुद्धिमत्पूर्वकमिति। अनुपलब्धपूर्वकोटिषु पर्वतादिषु कारणवत्त्वस्याप्रतीतेर्भागा

कि०ग०व्ली

सिद्धमिदमिति चेत्। न। द्रव्येषु सावयवत्वेन तद्गुणेषु कार्यगुणत्वेन कर्मसु कर्मत्वेनैव तदनुमानात्। कारण
वत्त्वस्यासर्वज्ञपूर्वकत्वेन सह दृष्टान्ते पटादौ दर्शनात् तद्विपरीतस्य पक्षे विवक्षितत्वात् विरुद्धमिति चेत्। न।
साहचर्यमात्रेणाविरोधात्। कार्यत्वेनानित्यत्वानुमाने रूपसाहचर्यवद् रूपस्य। अविनाभावाभ्युपगमे
त्वसर्वज्ञत्वाद्युपेतकर्तृपूर्वकत्वमुपस्थापयति हेतोः कस्तद्विपरीतमभिप्रेयाच्चतो विरोधः स्यादिति। असर
र्वज्ञस्य शरीरिणः प्रमाणनिरस्तत्वात्तमेव तद्विपरीतमभिप्रैमीति चेत्। नन्वेवमसर्वज्ञेन शरीरिणा हेतो
रव्याप्तता कुतस्तद्विपरीतेन विरोधः। तथाविधस्यानुपलब्धेरिति चेत्। सुतरां तर्हि विरोधासिद्धेरसंभवो
ज्ञाता अन्धेन रूपस्पर्शयोरिव परस्परधर्मिपरिहारेणाप्रतीतेः। प्रतीतौ चैकत्र धर्मिणि सहोपलम्भेन विरो
धस्य बाधितत्वात्। दर्शनस्पर्शनाभ्यां वायावनुपलम्भेपि पृथिव्यादौ रूपस्पर्शवत्। स्यादेत
त्। न हेतुसाध्यविशेषयोर्विरोधं विशेषविरोधमाचक्ष्महे किं नाम [illegible] धर्मता व्याप्यमानु
यमानयोर्विशेषयोरेव विरोधं। तथा हि। व्याप्तिस्तावद्दर्शनबलात् प्रवृत्ता यथादृष्टं विशेषमुपनयति। नान्यो

४५ कि कं मशरीरत्वादिति। पक्षधर्म्मतापि शरीरेण। किंचिद्वे नानित्यज्ञानादिमत्तानोपपद्यत इति त ४५
द्विपरीतमुपस्थापयति। न चानयोर्विरोधेः किंचित्सिध्यति। सोयं विशेषविरोध इति। एतदपि नास्ति
२३ स्वरूपेणानयोर्विरोधात्। परस्परानपेक्षाभ्यां च विशेषाभ्युपस्थानात्। न हि यो धूमवान्सोग्नि
मानिति केवलया व्याप्त्या किंचिदुपनीयते। तथा सति पक्षधर्म्मतावैयर्थ्यात्। नाप्ययं धूमवानि
त्यनया पक्षधर्म्मतया नियमानपेक्षया किंचिदुपस्थाप्यते। तथा सति व्याप्तिवैयर्थ्यात्। किंतु प
रस्परसहकारितया। तथा च निरपेक्षदशायां विशेषानुपस्थापनादेव विरोधासिद्धिः। सापेक्ष
दशायां सहोपलंभादेवेति। नन्वहो किं के विशेषमुपस्थापयति पक्षधर्म्मता सचेन्नो किं कर्त्ता
प्यनुस्मारितन सहतद्गतिक्रमः। ततः किं। स न सिध्येदिति चेत्। को नुत्तं साधयितुमुद्यतः। अनेनैव
विरोधेनान्योपि न सिध्यतीति चेत्। तदिदमायातं द्व्यणुकगतं कार्य्यत्वं कार्य्यसमवायिकारणेन स

नविरोधः ३

सिधं२

हत इत्यकार्यमपि न सिध्यतीति। स्यादेतत्। साध्यांशविशेषयोरेव विरोधं विशेषविरोधमाचक्ष्महे। त
था हि नित्यत्वमाकाशादौ ज्ञानत्वपरिहारेण ज्ञानत्वं नित्यत्वपरिहारेणास्मदादिज्ञाने। तथा कर्तृ शरीरित्वकुविं
दादौ शरीरस्या[illegible] कर्तृत्वं तु तस्य पशुकादेः। तदानयोर्ज्ञानत्वनित्यत्वयोः कर्तृत्वाशरीरत्वयोश्चैकधर्मि
संसर्गो विरुध्यत इत्येतदपि नास्ति। उपसंहारस्थानस्यैकस्य धर्म्मिणोप्रतीतेः। न ह्युष्णत्वशीतत्वयोः पा
वकयोरेव विरुद्धं किं कल्पयसि तेजसि वा पृथिव्यां वा क्वाप्युपसंह्रियमाणे। तदेतदपि नित्यत्वज्ञानत्वे धर्म्मिभे
देनाविरुद्धे अपि यद्यस्मदादिबुद्धौ गगने वोपसंहारे विरुद्धे इति विवक्षितमायुष्मतः। अशरीरत्वकर्तृत्वे
वा कुलालादौ पशुकादौ वा पसंहारादि विरुद्धे इत्यभिमतं चिरंजीवि नो ननम्ः किंचिदनिष्टमापद्यते। न हि मूर्त्त
त्वनित्यत्वेन न सिध्यतो दोषा वा विरुद्धे इति परमाणुसाधनस्य किंचिदपहीयते। अथ पक्षराले नितं ज्ञाने ६१
चोपसंहारायनयोर्विरोधो निर्धारितमेतिलंबितः सतहिं मुर्त्तत्वनित्यत्वयोः परमाणावविधर्मिसाधके

४६ नैव बाधित इति बुध्यस्वेति नास्ति विरोधगंधोपि विशेषविरुद्धोदाहरणां तु चंदनदहनवानयमसुरभिधूम
वत्त्वादिति द्रष्टव्यम्। स्यादेतत्। व्यापकानुपलब्धिबाध एव विशेषविरोध इत्युच्यते। तथाहि कर्तृव्यापकं शरी ४६
रादि तच्च तो व्यावर्त्तमानं कर्त्तारमपि व्यावर्त्तयति। उष्णादिविकारकारित्वेन हिमस्य वह्निमत्त्वसाधने तद्व्यापक
मौष्ण्यमिव व्यावर्त्तमानमग्निमिति चेत्। नैतदपि साधीयः। कस्य हि किमत्र व्यापकं किं कर्तुः शरीरित्वादिकं। अ
हो स्वित् कार्यत्वस्य शरीरादिमत्कर्तृपूर्वकत्वं। प्रथमे नेश्वरः कर्त्ता शरीरादिरहितत्वादिति प्रमाणार्थः स्यात्
तथा चाश्रयासिद्धिर्धर्मिग्राहकप्रमाणबाधो वा। सावयवाः परमाणवो मूर्त्तत्वादितिवत्। द्वितीयस्तु नि
यमः प्रत्यक्षज्ञायमानांकुरादावेव शरीरिणः कर्तुरनुपलंभेनेन निरस्तः। दृष्टांतस्तु सर्वथैवासङ्गतः। उ
ष्णादिविकारो हि यदि रूपादिपरावृत्तिमात्रं हेतुः। तन्नूनमौष्ण्यापेक्षोरावेजसां कर्त्तव्यः। तादृशो च पाके
निमित्तं हिममिति न किंचिदनिष्टमापद्यते। न हि सौरस्य तेजसस्तेनौष्ण्यपाकहेतोः हिमादपगमः ज्ञ

मते। अथ विकारो नस्मादिरूपो ऽग्निमतः सोसिद्ध एव हिमद्रुतेषु त्वष्णादिषु व्यविरोधो बाधो वा। अथ रूपा
दिपरावृत्तिमात्रं पौवाग्निः साध्यते। तदशक्यं। तस्य दर्शनस्पर्शनग्राह्यस्य योग्यानुपलंभेन बाधितत्वात्। अत
दृशस्य तेजोमात्रस्य निवृत्तेरनिष्टत्वादशक्यत्वाच्च। तस्माद्व्यापकानुपलब्ध्यानुमानं बाध्यत इति रिक्तं वचः। स ल ३
त्प्रतिपक्षस्तु कथं चित्स्यात्। अग्निमद्धिमं उष्णादिविकारहेतुत्वात्। निरग्निकं हिमं तथाविधोष्ण्यरहितत्वा
तर्कि० ५ त्। अस्त्वेतदेव प्रकृते शरीरानपेक्षोत्पत्तिकमकर्तृकं शरीरानपेक्षोत्पत्तिकत्वाद् गगनवदिति। न। शरीरानपेक्ष
या उत्पत्तेरसाधारणत्वात्। सकर्तृकादङ्कुरादेरिवाकर्तृकादाकाशादेरपि व्यावृत्तत्वात्। उत्पत्तिव्यावृत्ति
मात्रस्य चासिद्धेः। शरीरादनुत्पत्तेश्चासमर्थविशेषणत्वात्। समर्थस्ये गगनादावनुत्पत्तिमात्रस्यैव व्याप्यत्वे
निश्चयात्। निश्चितव्याप्तेश्च पक्षोपनयनात्। अन्यथातिप्रसङ्गादिति। स्यादेतत्। यथा ज्ञानस्य नित्यत्वे शरीरा
पेक्षा नास्ति। ज्ञानगैकार्यत्वप्रयुक्तत्वाच्छरीरसंबंधस्य। तथा प्रयत्नस्य नित्यत्वे ज्ञानापेक्षापि न स्यात्। प्रयत्न

४७ गतकार्य्यत्वप्रयुक्तत्वाज्ज्ञानसंबंधस्येति तर्कोपरिशुद्धिरस्तु दूषणमिति चेत्। एतदप्यसारम्। ईश्वरमधि ४७
कृत्य तर्काणामाश्रयसिद्ध्यसिद्धिभ्यामनवसरदुःस्थत्वात्। यदीश्वरः कर्त्ता स्यात् शरीरवान्स्यादनित्य
ज्ञानवांश्च न वेत्। यदीश्वरस्य प्रयत्नः स्यादनित्यः स्यात्। यदीश्वरप्रयत्नो नित्यः स्यात् ज्ञानानपेक्षः स्या
त्। यदीश्वरस्य बुद्धिः स्यात्सर्वविषया न वेदित्यादयो हि ते। द्वितीयादिमधिकृत्य विपर्यये पर्यवसानाव
यधि विवादाध्यासितं बुद्धिमद्धेतुकम् न विषयदनित्यप्रयत्नजन्यमाप्तस्य तत् शरीरजन्यं वा न विषयदसर्वज्ञ
कार्यं वेत्यादयो हि ते तद्विपर्यये च व्याससमर्थविशेषणत्वेन प्रागेव दूषित इति। न च प्रयत्नेन बुद्धिरिह साध्यते
बुद्धावप्रयत्न इतरव्यावृत्त्या वान्यतरव्यावृत्त्यैनतत्संबद्धोपाधिकत्वं चोद्यमवकाशमासादयेत्। किंतु बु
मवत्वेन दृष्टं यन्न यत्नवद्वह्निमत्त्वमिव कार्यत्वेन परिदृष्टसामर्थ्यकारकप्रयोक्तृमत्त्वं। तथा च साध्यांशयो
र्ज्ञानप्रयत्नयोर्हेतुनाद्वंद्वनयो रविसोपाधिरपि संबन्धो हेतुं न दूषयति। तस्य साध्यसंबन्धे निरुपाधिक

त्स्यादिति। ननु कारणविशेषादवश्यं कार्यविशेषेणानुवितव्यम्। अस्ति च क्वेषुचिच्छरीरादि कारणं ततो विशेषः
स्यात्। अवश्यं चैतदभ्युपगंतव्यम्। अन्यथा शरीरिकर्तृकत्वानुमानं न स्यात्। स च विशेषो यद्दृष्टैर क्रिया द
र्शिनोऽपि कृतबुद्धिरुत्पद्यते। तदित्यद्दूर विप्रकर्षे प्रोच्यते। ततः सहायकर्त्तारं प्रयोजयति। कार्यत्वसामान्यन्तु त
त्प्रयुक्तां व्याप्तिमुपजीवतीति। न। विशेषस्य विशेषं प्रत्येव प्रयोजकत्वे सामान्यं प्रत्यनुपाधित्वात्। अन्यथा घ
टादिष्वेवांतरविशेषेषु सत्सु यद्दृष्टैः स्त्याद्युपलक्षितोऽपि विशेषस्तत्प्रयुक्तां व्याप्तिमुपजीवतीत्यप्रयोजकः स्यादि
तिप्रत्किंचिद्वत्। तर्कस्तु। यदि कार्य्यं कर्त्तारमतिपतेत् कारणांतरमप्यतिक्रामेत्। तथा च कार्यत्वमेव हीयेतेति
न३ संक्षेपः। विस्तरस्तु न्यायकुसुमांजलावात्मतत्त्वविवेके चाध्यवसेय इति। अस्तु तावदेवं विशेषस्य तु कुतः सिद्धिः। यथाद्य
प्रतीतेन विरोधादिप्रत्येतुमशक्यत्वात् तस्य साधनमप्यशक्यम्। लघुरूपं हि कंचिल्लिंगं चिद्विधीयत इति चेत्।
न। सामान्यसंबन्धबलेन साध्यसामान्यविधानुपक्रांते तत्सहकारिपक्षधर्म्मतावशादप्रतीत एव विशेषे

४८ पर्य्यवसानात्। सामान्यसंगतिबलप्रवृत्तानां पदानामाकांक्षादिसहकारित्वछेर लौकिकइव वाक्यार्थ इति प्रमाण ४८
वृत्तम्। अन्यथा न किंचित्कंचिदप्रतीतं प्रतीयेतेति। अत्र कश्चिदाह। कृतं तर्हि केवलव्यतिरेकिणा अन्वयेनैवाष्ट प०
द्रव्यव्यतिरेकादिपरिसिद्धेः। तदसत्। आकांक्षानुपपत्त्या विशेषव्यवस्थापनात्। शाब्दो ह्यर्थो यावता विना
नान्वयमुपैति तावंतमनालंब्य प्रतीतेरपर्य्यवसानमाकांक्षेत्युच्यते तेनानवधिरन्वयिनः। तत्प्रती
तौ पर्य्यवसितायां क्वचिद्विशेषे प्रमाणांतरबाधो ऽनुपपत्तिः तावती च सीमा व्यतिरेकिणः। तदत्र न गादिद्व्य
णुकपर्य्यंतपक्षीकरणे त्वकारणाप्रमाणवादिविषयं ज्ञानं यदि न स्यात् क्वांशे बाधो गंगासागरादिसकर्तृकमि
ति। परिदृष्टसामर्थ्यकारकचक्रप्रयोक्तृः कर्तृशब्दवाच्यत्वात्। एवं सर्गादिकार्य्यपक्षीकरणे तु कालिय
दिनशरीराद्यनपेक्षं ज्ञानं कार्य्यैः सर्गादिकार्य्यं बुद्धिमत्पूर्वकमिति। सर्गसन्निकृतो हि शरीरेन्द्रियविषयग्रामवि यर
रहोपलक्षितः कालः सर्गादिरित्युच्यते। तस्माद्विशेषप्रतीत्यपर्य्यवसानादिह पक्षधर्मतासहायात् का

र्य्यत्वादेव नित्यसर्वज्ञकर्तृसिद्धिः। इत्यादयः क्वाचिदाश्रिताः कार्य्यत्वाकुणत्वाद्वा इत्यत्र त्वष्टद्रव्यातिरिक्तद्रव्यपार
तंत्र्यमप्रतीत्यशब्दार्थो न प्रतीयत इति नास्ति न ह्याश्रयादिशब्दाः क्षित्यादिव्यतिरिक्तार्थाः क्षित्यादिविरुद्धार्था वा येन
तत्प्रतिक्षेपो नियमेनेच्छादिपदार्थानामन्वयः। प्रमाणांतरबाधपर्य्यालोचनया त्वनुपपत्तिरिति अन्यदेतत्॥ ॥॥
आकाशनिरूपणप्रसंगेन कालदिशोरुपन्यासः। आकाशकालदिशामिति। पारिभाषिक्यो निमित्तमंतरेणाप्र
गग्राहिक[illegible]यास्तिस्रः संज्ञा भवंति। आकाशकालो दिगिति। कुतो हेतोरित्यत आह। अपरजात्यभावे सतीति। अपरजाती
नामाकाशत्वादीनामभावादित्यर्थः। तदेव कुत इत्यत आह। एकैकत्वात्। व्यक्तिभेदाभावात्। नित्यमेकमने
कवृत्तिसामान्यमिति लक्षणाव्याघातेन स्वरूपव्याघातादिति भावः। तथापि पारिभाषिकत्वमनुपपन्नमती
न्द्रियत्वेन स्वरूपनिर्देशानुपपत्तेः। यः शब्दाश्रयस्तदाकाशमित्येवं शब्दाश्रयत्वमेवोपाधिः स्यात्। न। शब्दा
श्रयत्वस्योपलक्षणतया तदवस्थत्वात्। अयमसौ देवदत्त इत्यत्र दण्डवत्। अन्यथा शब्दगुणमाकाशमिति सह

कि०पा०ली

४७ प्रयोगो न स्यात्। अथैवमाकाशादिशब्देभ्यः परस्त्वतत्वादेर्निरर्थकत्वमापद्यत इति चेत्। न। आकाशस्य स्वरूप ४७
मिति वदोपचारिकत्वाद्याद्वृत्तिपरत्वादेतेतस्य स्वरूपव्यवस्थितये द्रव्यत्वव्यवस्थितये च गुणानाह। तत्रेति। तास्वा
काशकालदिक्षु मध्ये। आकाशस्य शब्देन स्वरूपं संख्यादिना द्रव्यत्वं च व्यवस्थाप्यते। अस्फुटतया च सुष्पस्तत्र
प्रवृत्तेः। तस्य रूपयोग्यतामुपादायैव ग्राहकत्वात्। अन्यथा मनसोऽपि चाक्षुषत्वप्रसङ्गात्। कथं तर्हि हि पज्ञीनि
रूपदर्शी प्रत्यय इति चेत्। आलोकमण्डलमाश्रित्येति ब्रूमः। तथापीहालोको नेहालोक इति कथमिति चेत्। तद
वयवानाश्रित्येति [illegible]ः। यत्किंचिदेतत्। कथं पुनः शब्दस्तत्स्वरूपव्यवस्थापक इत्यत आह। शब्द इति। न स्पर्शवद्वि
शेषगुणः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात्। यो हि स्पर्शवद्विशेषगुणं शब्दमिच्छति सोऽपि स्थूलवीणाशंखा
द्याश्रयमिच्छेन्न तु परमाण्वाश्रयम् प्रत्यक्षत्वप्रसङ्गात् परमाणुगुणानामतीन्द्रियत्वात्। तथा च स्थूलाश्रयस्यासा
मान्यवत कार्यत्वेन सामान्यादित्रयव्यवच्छेदे स्पर्शरहितस्य द्रव्यत्वव्याप्तौ प्रतिनियतेन्द्रियग्राह्यतया चक

प२

र्मत्वानुपपत्तौ विशेषगुणत्वमुन्नीयादि सिद्धम्। स्पर्शवद्द्रव्यं प्रतिशब्दस्य तत्प्रतिषेधः प्रतिज्ञायते। न स्पर्शवद्विशे
षगुण इति। तत्र हेतुरकारणगुणपूर्वकत्वादिति। स्पर्शवतां शंखादीनां यावन्निसमवायिकारणानि तेषां ये गुणास्तदनपे
क्षत्वात्। ये पुनः स्पर्शवद्विशेषगुणा न ते तदनपेक्षा यथा रूपादय इति केवलव्यतिरेकी। अत्र च पिठरपाका
भ्युपगमान्न तद्विशेषगुणे विरोधः। परमाणुगुणोऽस्तु स्यात् निषेधार्थमाह। प्रत्यक्षत्वे सतीति। हेत्वन्तरमा
ह। अयावद्द्रव्यभावित्वादिति। सत्स्वेव शंखादिषु निवृत्तेः। ये पुनस्तेषां विशेषगुणा न ते तेषु सत्सु निवर्तन्ते य ते५
था रूपादयः। अत्रापि पूर्ववत्प्रत्यक्षत्वे सतीत्यनुषञ्जनीयम्। अन्यथा परमाणुगुणैरेव निषेधः स्यात्। सु ज५
खादीनामात्मगुणत्वे सिद्धावन्वयेऽपि द्रष्टव्यः। अनयोस्तर्कौ सूचयति। आश्रयादन्यत्रोपलब्धेरिति।
आश्रयान्निर्गताच्छंखादेरन्यत्र कर्णशष्कुल्यवच्छिन्ने नभस्युपलब्धेः। यदि हि शंखाद्याश्रयः शब्दः स्या
च्छंखादिपिधानेनोपलभ्येत। कर्णविवरपिधान इव सर्वदैवाप्राप्तेः। अग्राह्यस्य च ग्रहणे सर्वत्र सर्वैः स

५० बधिराद्युपलम्भप्रसङ्गः। नच शब्दाश्रयवस्तोः प्राप्तिरस्ति। नचाश्रयानपेक्षा एव गुणाः परेणाप्राप्यन्ते। तस्माच्छं ५०
खादीनि निमित्तान्यपेक्ष्य यद्द्रव्यान्तरे वर्त्तमानो वीचीतरङ्गन्यायेन कर्णशष्कुलीमन्तर्भाकाशदेशमासज्य उप
लभ्यते। अन्यथा त्वनुपलब्धिप्रसङ्गः। ननु वायुगुणो भविष्यति। अन्यस्यापि हि भेर्यादिषु ताड्यमानेषु यावद्द्व
गमनं प्रतिष्ठमानः पवनो निमित्तीभवतीत्यभ्युपगमः। वदन्ति च केचिद्वायुगुण एव स शब्दतामिति। न। श्रोत्रस्य प्र
तिनियतार्थग्राहकत्वेन बहिरिन्द्रियत्वात्। बहिरिन्द्रियस्य च ग्राह्यजातीयविशेषगुणवत्त्वनियमात्। अन्यथा
सर्वस्य सर्वार्थत्वे ऽन्धबधिराद्यभावप्रसङ्गात्। एकस्य सर्वार्थत्वे तद्ग्राह्यैर्गुणैरन्यानुपलम्भप्रसङ्गात्। त
था च शब्दस्य वायवीयत्वे श्रोत्रस्यापि वायवीयत्वप्रसङ्गः। ततः किमिति चेत्। एकस्यैव स्पर्शशब्दग्राहकत्वे
अनेकार्थतया बाह्यत्वव्याघातः। बाह्यत्वे वानेकार्थत्वानुपपत्तिः। वायवीयत्वाविशेषे ऽपि त्वक्श्रोत्रयोर्व्यक्ति
भेदात्प्रतिनियतार्थत्वाविरोध इति चेत्। न। प्रतिशरीरं घ्राणादीनां व्यक्तिभेदे ऽपि विषयवैचित्र्यादर्शनात्। अदृष्ट
वैचित्र्याद्देवमपि स्यात्को विरोध इति चेत्। तर्हि पार्थिवैकप्रकृतीनामेवादृष्टवैचित्र्यादुत्पादवैचित्र्यं विषयव्य

वस्थायैव भविष्यति। कृतं रसनादीनां प्रकृत्यन्तरकल्पनया। बाह्यानुसारेण तत्र तथेति चेत्। समः समाधिः। त
स्माद्यथोक्तहेतुभ्यः शब्दो न स्पर्शवद्विशेषगुण इति आत्मगुणो भविष्यतीत्यत आह। नात्मगुणः कुत इत्यत आ
ह। बाह्येन्द्रियप्रत्यक्षत्वात्। मनसो ऽन्यदिन्द्रियं बाह्येन्द्रियं तत्प्रत्यक्षत्वात्। गंधवदित्यन्वयी। बाह्येन्द्रियत्वं च श्रोत्र
स्य प्रतिनियतविषयत्वात् चक्षुर्वत्। आत्मगुणानां बाह्येन्द्रियेण ग्रहीतुमयोग्यत्वात्। अन्यथा बुद्ध्यादीनाम
पि तथात्वप्रसङ्गः। हेत्वन्तरमाह। आत्मान्तरप्रत्यक्षत्वादिति। यत्र स्थः शब्दस्ततो ऽन्य आत्मा आत्मान्तरं तद्ग्रा तथ
ह्यत्वादित्यर्थः। वीणाद्याश्रयतया हि शब्दः प्रतीयते। तत्संतानन्यायेन श्रोत्रस्थो वा तस्मादन्यश्चास्य ग्राहकः।
यत्र आत्मगुणा गृह्यन्ते ग्राहकस्यैव गृह्यन्ते। यथा सुखादयः। गृह्यमाणस्तु शब्दो न ग्राहकस्थ इति। तदे
वकृतमिति चेदित्यत आह। आत्मन्यसमवायात्। इदमप्यसिद्धमित्यत आह। अहंकारेण विभक्तस्य व्यधिकर
णस्य ग्रहणात्। वीणा वाद्यते वेणुः पूर्यते तत्र शब्दोऽहं वा पूर्ये वेति कस्यचिद्व्ययः। अहंकारेण व्यधि
करणस्यात्मसमवाये गन्धादीनामपि तथात्वप्रसङ्गः। अन्ये त्वात्मान्तरेण ग्राह्यत्वादिति। अनेकप्रतिपत्तृ

५१ साधारणत्वादिति हेत्वर्थं विवृणोति। सत्संदिग्धासिद्धः। संतानानुमानेन मूलप्रत्यभिज्ञानान्नैष दोष इति ५१
चेत्। तर्हि सुखादीनामप्यनुमानेनानेकप्रतिपन्नत्वे साधारणप्रत्यभिज्ञानविषयत्वात्। अनैकान्तिको
हेतुः स्यात्। आत्मसमवेतस्य च वीचीतरंगन्यायेन मूलप्रत्यभिज्ञानोपपत्तौ विपक्षे बाधकाभावाच्च। तस्मा
द्यथाव्याख्यानमेवास्तु। न दिक्कालमनसां विशेषगुण इति शेषः। अत्र हेतुः श्रोत्रग्राह्यत्वात्। अत्र श्रोत्रेति
स्वरूपनिवेदनमात्रं ग्राह्यत्वात् इत्यादिरेव हेतुः। गंधादिवदिति। आत्मगुणत्वे शब्दस्य मनसः श्रोत्रस्य सां
कर्यप्रसङ्गः। दिक्कालमनोगुणत्वे च शब्दस्य विशेषगुणत्वव्याघातः। हेत्वंतरमाह। विशेषगुणभावाच्चेति।
दिक्कालमनसामिति विशेषगुण इति वाक्यशेषः। प्रयोगस्त्वेवं शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वाज्ज
धादिवत्। तद्गुणत्वे शब्दस्य तेषां तत्त्वव्याघातः। धर्मिग्राहकेण प्रमाणेन तेषां विशेषगुणाप्रतिक्षेपादिति। न
नु यदि नाम शब्दः पृथिव्यादीनामष्टानां गुणो न भवति मा भूत्। आकाशं तु नवममस्तीति किं प्रमाणमत
आह। पारिशेष्याद्गुणो भूत्वाकाशस्याधिगमे लिंगमिति। अयमर्थः। शब्दस्तावद् द्रव्याश्रितो गुणत्वात् रूपवदिति

आश्रित ८

सामान्यतो द्रव्यसिद्धौ शब्दाश्रयत्वेनाकाशसंज्ञायां निवेशितायां तदाकाशं पृथिव्यादिभ्यो भिद्यते। शब्दाश्र
यत्वात्। यत्पुनर्नैतेभ्यो भिद्यते नासौ शब्दाश्रयो यथा पृथिव्यादय एव न च नायं शब्दाश्रयस्तस्मादितरेभ्यो
पृथि ३ भिद्यत इति। यथा च पृथिव्यादिषु शब्दो न समवैति तथोक्तमधस्तादिति निरवद्यम्। सोयं परिशेषो व्यतिरेकः। तदि
मुक्तं गुणो भूत्वेति। एवमाकाशस्य स्वरूपे सिद्धे शब्दगुणत्वं च गुणांतराण्यस्यैवाह। शब्दलिंगविशेषादिति। य
द्यपि द्रव्यत्वादेव सामान्यतः संख्यायां सिद्धायामेकत्वमपि सिद्धम्। न ह्येकत्वमन्तरेण समवायिकारणा
निरपेक्षं द्वित्वादिकं सिध्यति। न वित्त्वं च तत्र द्वित्वादिना। पृथिव्यादीनां नवानामपि नानात्वयाणामित्यादिव्य
वहारस्य बाधकं विना संख्यानिमित्तत्वात्। अन्यथा पृथिव्यादिष्वपि सा न स्यात्। तथापि शब्दाश्रयस्य द्रव्य
स्यानेकत्वव्यवच्छेदेन नियतमेकत्वं साधयितुमयमारम्भः। तच्चैवं भवेत् सति शब्दलिंगमविशिष्टं सत्साध
यति। सर्वेषामेव शब्दानां तदेकाश्रयत्वेनैवोपपत्तावाश्रयांतरकल्पनायां कल्पनागौरवप्रसंगात्। श्रोत्र
व्यवस्थाप्यदृष्टव्यवस्थयोपपद्यत इति वक्ष्यमाणत्वादिति। तदनुविधानार्थं तदपि पूर्ववत्। द्रव्यत्वेनास

५२ मान्यतः परिमाणसिद्धौ सत्यामाह । विभववचनादिति । विभवान्महानाकाशस्तथा चात्मेति सूत्रकारवचना ५२
दित्यर्थः । विभुत्वमसर्वमूर्त्तिमद्भिः सह संयोगः । तस्मात्परममहत्परिमाणं परिमितस्य संयोगानुपपत्तेः । परमम
हदिति भावप्रधानो निर्देशः । अथवा परममहत्त्वेऽस्य परिमाणं परममहत्परिमाणमिति षष्ठीतत्पुरुषः । सा
मानाधिकरण्ये हि परममहत्परिमाणमिति स्यात् । अथ विभुत्वस्य सिद्धिः कुतः सिद्धिः स्पर्शशून्यत्वे सति प्रत्य
क्षगुणाश्रयत्वात् आत्मवत् । अन्यथा परमाणुत्वे प्रत्यक्षगुणाश्रयत्वविरोधात् । सावयवत्वे स्पर्शशून्य
यद्यपि त्वविरोधात् । शब्दकारणवचनात् संयोगविभागौ संयोगाद्विभागाच्छब्दाच्च शब्दस्य निष्पत्तिरिति सूत्र
कारवचनात् संयोगविभागौ ... त्वेनैव संयोगविभागयोः सिद्धिस्तथापि विपक्षबाधकं वक्तव्यमिति
तदुच्यते । यदि संयोगविभागौ न नभसि न स्यातामसमवायिकारणाभावे शब्दो नोत्पद्येत तर्हि यद्यपि घ
र्म्मिग्राहकादेव प्रमाणाद्द्रव्यत्वमप्यस्य सिद्धम् । तथापि संख्यादिना गुणेनापि तत्साधयितुं शक्यमिति तद

तद२

प्याह । अन्त इति । गुणवतो द्रव्यत्वेन लक्षणाव्याघातादिति । अनाश्रितत्वाच्चेति । आश्रयैकस्वभावत्वाच्चेत्यर्थः ।
अन्यथा समवायेन व्यभिचारः स्यात् । आश्रयैकस्वभावस्य सिद्धद्रव्यत्वे गुणत्वाद्यापत्तौ स्वरूपव्याघातादिति यद्यप्येक
५४ त्वादेव नित्यत्वात् कार्यत्वसिद्धेरनित्यत्वे कार्यत्वे च ततः पूर्वं पश्चाच्च श्रूयमाणाः शब्दा आकाशान्तरवर्त्तेरन् । तस्मा
देकत्वादेः पूर्वापरकोटिविकल्पेन नस्तथापि प्रपञ्चार्थमाह । समानेति । तथा हि नास्यारम्भकं न भव एव । तेनैव त
स्यानारम्भात् । नापि नभो न स्वसमत्वात् । नापि विजातीयं पृथिव्यादि । कारणगुणप्रक्रमेण कार्यरूपादिसत्त्वप्रसं
ङ्गात् । नाप्यात्मदिक्कालमनांसि स्पर्शशून्यत्वात् तेषामनारम्भकत्वादिति । शब्दाश्रयतया परार्थत्वमस्योक्तं संप्र
ति तदुपलम्भस्वभावतया परार्थमाह । सर्वप्राणिनामिति । तर्हि सर्वेषां सर्वशब्दोपलब्धिः स्यात्तस्य सर्वसाधार
णत्वात् । व्यापकत्वाच्चेत्यत आह । श्रोत्रभावेनेति । ननु किमिदं श्रोत्रं न हि पृथिव्यादिघ्राणादिवदाकाशस्यापि कि
ञ्चित्कार्यद्रव्यमस्तीत्यत आह । श्रोत्रं पुनरिति । पुनःशब्देन पृथिव्यादिकार्येभ्यो घ्राणादिभ्यो व्यवच्छिनत्ति । अ
यतो कर्णशष्कुल्यौ तयोर्विवरं तस्य प्रदेशो नभोदेशः । अव्याप्यवृत्तिसंयोगोपचारादेशव्यपदेशः । ननु सर्वबधिर

शब्देनेति   दुःखव॰

५३ स्याप्यसीद्यत्तत्राह। शब्देन निमित्तेन विषयतया यदुपभोगः सुखदुःखानुभवस्तत्प्रापकाभ्यां धर्माध ५३
र्माभ्यामुपनिबद्धो विशिष्ट इत्यर्थः। एवं सति च विशेष्यसद्भावेऽपि विशेषणताशास्त्रे वैकल्प्यालोकस्य चिद्धा
धियोऽयं यथा शरीरसद्भावेऽप्युपभोगहेत्वदृष्टवैकल्यात् सुखज्ञानाद्यनुत्पत्तिः स्यादाह। तस्य चेति। उपलब्धु
रात्मेत्यर्थः। कर्मसमवायादिना भुविर यथाघातादपि बाध्यते भवति। अन्यथा भैषज्यादिप्रयोगवैयर्थ्यापत्तिरिति॥
॥०॥ कालस्य लक्षणमाह॥ काल इति। अत्र परापरेति भावप्रधानो निर्देशः। परत्वापरत्वव्यतिकरः परापर ५
व्यतिकरः। दिक्कृताभ्यां परत्वापरत्वाभ्यां विपरीतपरत्वापरत्वे इत्यर्थः। परापरव्यतिकरश्च यौगपद्या
दिप्रत्ययाश्चेति समासः। तानि लिङ्गानि यस्य स तथोक्तः। परत्वापरत्वयोरुत्पत्तिर्गुणे वक्ष्यते। तेषु स्थवि
रयोर्वर्तमाने कालमनुमापयतः। कथं बहुतरतपनपरिस्पन्दान्तरितजन्मनि स्थविरे युवानमवधिं
कृत्वा परत्वमुत्पद्यमानमसमवायिकारणवत्कार्यत्वादिति स्थितेरूपादीनां च व्यभिचारे तपनपरि

परत्वा॰   नि३

ग्रा३

स्पन्दानां च वैयधिकरण्यात्तदवच्छिन्नद्रव्यसंयोगोऽसमवायिकारणमिति ज्ञायते। न चावच्छिन्नो द्रव्यस्य संयोगस्स ५२
श्चा भवितुमर्हति विभूनि तेरादिति। तद्द्रव्यं विभु स्यात्। न चात्माकाशौ तथा भवितुमर्हतो विशेषगुणत्वात्। पृथि
व्यादिवदित्याचार्याः। अत्रैवालोचनीयम्। पृथिव्यादीनां संयोगस्यैतद्धेतुत्वे विशेषगुणवत्त्वमप्रयोजकं स्पर्शा
दिगतिप्राप्तिविरहस्योपाधेः सत्त्वात्। अन्यथा मनसस्तथाभावप्रसङ्गात्। विशेषगुणविरहिणस्तस्याकारणा
त्वे जातेरन्यस्य कारणस्याभावात्। तस्माद्विशेषगुणत्वाविशेषेऽपि पृथिव्यादीनामव्यापकत्वात् परत्वाद्य
कारणत्वं व्यापकत्वादात्माकाशयोस्तत्कारणत्वं भविष्यतीति को विरोधः। विप्रकृष्टबुद्धिमपेक्ष्योत्पद्यमानं वि
प्रकृष्टबुद्धिं निमित्तीकरोति। अल्पतरस्य रसंचरणापेक्षया बहुतरतपनपरिस्पन्दान्तरितत्वं च विप्रकर्षः। तं
चैतस्य स्थविरशरीरस्य स्वरूपतः सं भवति। तपनसम्बन्धेन कर्मणा तस्य संबन्धाभावात्। अतोऽयं द्वारा संयुक्तसंयुक्त
समवायलक्षणया प्रत्यासत्त्या सूर्यगतिः स्थविरमुपावर्तते तद्द्रव्यमस्ति। न च पृथिव्यादि तथा भवितुमर्हति। अत्रा

५७ र्व्यभिचाराच्च । अतः सकलमूर्त्तसंयुक्तेनैतेन भवितव्यं । नचाकाशात्मानौ तथा भवितुमर्हतः । विशेषगुण
वत्त्वात्पृथिव्यादिवदित्याचार्य्याः । नन्वप्रयोजकमेतत् । अप्राप्त्युपाधिकत्वात् । अन्यथा मनसस्तथाभावप्रस
ङ्गात् । विशेषगुणरहितस्य तस्याकारणत्वेऽप्राप्तेरन्यस्य प्रकारस्याभावात् । तस्माद्विशेषगुणवत्त्वावि
शेषेऽपि पृथिव्यादीनामव्यापकत्वात्परत्वाद्यकारणत्वं । व्यापकत्वादात्माकाशयोस्तु कारणत्वं भवि
ष्यतीति को विरोधः । न । आकाशस्यस्य च प्रत्यासत्तिमात्रेण संयुक्तसंयुक्तसमवायिनं धर्म्मं । अन्यत्र संक्रामयि
तुमसमर्थत्वात् । तथात्वे चैकत्र भेर्य्यामभिहतायां सर्व्वभेरीषु शब्दोत्पत्तिप्रसङ्गात् । स्वर क्रियावद्भेरीसंयो
गस्यापि संयुक्तसंयुक्तसमवायाविशेषात् । कालस्य तु तस्य भावत्वादयमदोषः । असिद्धिदशायां प्रसङ्गस्य
प्रयासिद्धेः । सिद्धिदशायां च बाधितत्वात् । आत्मनोपि द्रव्यान्तरधर्म्मेषु द्रव्यान्तरावच्छेदाय स्वप्रत्यासत्त्यतिरिक्त
सन्निधापेक्षत्वात् । अन्यथा वाराणसीस्थितेन नीलेन पाटलिपुत्रस्थितस्य स्फटिकमणेरुपरञ्जनप्रसङ्गात् । का

का ।   संबंधः ५

न्वयव्यतिरेकाद्

लस्य तु विप्रकृष्टक्रियोपसंक्रमणाशक्ततयैव सिद्धेर्न्नायं प्रसंग इत्यवदातम् । तस्य प्रमाणार्थः । स्थवि
रादौ परत्वं तपनपरिस्पन्दप्रकर्षबुद्धिजन्यं तदनुविधायित्वात् । परत्वबुद्धिवत् । ते च तपनपरिस्पन्दाः
स्थविरशरीरप्रत्यासत्तिमपेक्षन्ते । स्वभावतोऽप्रत्यासन्नत्वे सति तस्य च्छेदकत्वात् । पटाद्यवच्छेदकमहा
रजनरागवत् । सा च प्रत्यासत्तिर्द्रव्यकृता प्रकारान्तरासंभवे सति प्रत्यासत्तित्वात् । पटे महारजनराग
प्रत्यासत्तिवत् । अन्यथा प्रत्यासत्त्यभावे सन्निकर्षविप्रकर्षयोरसंभवादपेक्षणीयानुपपत्तौ परत्वाद्यनु
पपत्तिप्रसङ्गे तद्व्यवहारविलोपप्रसङ्गः । तच्च द्रव्यमितरेभ्यो भिद्यते विशिष्टपरत्वाद्यनुमेयत्वात् । यत्पुनर्न्नै
तरेभ्यो भिद्यते न तदेवं यथा पृथिव्यादिरिति । एतेन परत्वं लिङ्गं तया व्याख्यातम् । यौगपद्यमेककालता । अ
यौगपद्यमनेककालता । चिरत्वं दीर्घकालता । क्षिप्रत्वमचिरकालता । अत्र कालशब्देन कालोपाधयः
सूर्य्यगत्यादय उच्यन्ते । तथा प्रत्ययैः कालोनुमीयते । ननु प्रत्ययाः कारणतया विषयतया वा कालं व्यवस्था
पयेयुः । न प्रथमः । आत्मेन्द्रियादीनां तत्कारणत्वात् । न द्वितीयः । तस्यातीन्द्रियतयेन्द्रियकप्रत्ययविषय

रि ५

+ द्व्यादिप्रत्ययविलक्षणानां२

प२ष्म२

५५ त्वविरोधाद्यादतआह। तेषामिति। विषयेषु घटपटादिषु युगपद्भवन्ति। युगपत्कुर्वन्तीति। युगपदुत्पन्नानां द्व्या ५५
दीनां पूर्वप्रत्ययविलक्षणानां द्व्यादिप्रत्ययव्यावृत्तावप्यनुवृत्तेस्तदनुवृत्तावपि तेषां व्यावृत्तेर्विलक्षणत्वेन वि
निश्चितानामुत्पत्तावन्यस्य निमित्तस्यासंभवात्। कालमंतरेणेति शेषः। एते युगपज्ज्ञायन्ते कुर्वन्त्यवतिष्ठ
न्ते विनश्यन्ति च्यादीनामेकस्मिन्काले एकस्याः सूर्यादिगतेरेकस्य सूर्यादिगत्यवच्छिन्नाइत्यर्थः। न चाप्रात
सूर्यादिगतया विषयाक्रमव्यवच्छेत्तुमुत्सहत्वेन तत्स्वरूपेणाज्ञातासां ज्ञाविरस्ति। तस्माद्विशिष्टप्रत्ययान्यथानुप
पत्त्या विशेषणप्रापकं द्रव्यमुपकल्प्यते। अन्यथा निमित्तमंतरेणा नैमित्तिकस्य प्रत्ययस्यासम्भवप्रसङ्गः। नन्व
वाच्यसंबन्धस्य प्रतीतौ विशिष्टप्रत्ययो विशिष्टप्रत्ययेन व तत्प्रतीता वितरेतराश्रयत्वमिति। नह्यवस्ते बध्यो
विशेषणमपि तु क्रिया सा च प्रतीतैवेति सर्वं सुस्थम्। विशेषणसम्बन्धोहि विशेष्यप्रतीतौ सन्नवयेद्योपयुज्य
ते। न तु ज्ञानेन। अन्यथा समवायस्यातीन्द्रियत्वाद्गुणकर्मसामान्यविशिष्टप्रतीतिर्विशेषिकनयेदत्त

त्वांजलिः स्यात् परेषामप्यहं शरीरीत्यादिरदृष्टस्य नियामकस्याप्रतीतौ विशिष्टप्रत्ययो न स्यात्। तस्माद्वि
शिष्टप्रत्ययान्यथानुपपत्त्या विशेषणसंबन्धः प्रतीयते न तु संबन्धाप्रतीतौ विशिष्टप्रतीतिरेव न सिद्ध्यतीति स्थितिः। यत्र
त्वा धर्म्ममुक्तं सर्वोत्पत्तिमतां निमित्तकारणत्वमिति तदाह। सर्वकार्य्याणामिति। उत्पत्तिरात्मलाभः। स्थितिराविना
शात्क्रमवत्सहकारिसम्बन्धः। विनाशः प्रध्वंसः। एतेषां हेतुः। अत्र प्रमाणमाह। तद्व्यपदेशात्। तेन कालेनोत्प
त्यादीनां व्यपदेशात्। अद्योत्पन्नः श्वः परश्वो वेति। इदानीमत्रास्ति अद्य नष्टः श्वः परश्वो वेति व्यपदेशात्। यथा
चैतत्तथोक्तं व्यवहारान्तरहेतुतामाह। क्षणेति। उत्पन्नं द्रव्यं यावद्गुणमुत्पन्नेऽन्यतन्त्वसंयोगे यावन्न पटउ
त्पन्ने कर्म्मणा यावन्न विभागस्तावत्कालः क्षणः। अथवा सामग्री स्वकार्य्यरहिता क्षणइति संक्षेपः। अक्षिपक्ष्मक
र्म्मकं निमेषइत्यादि गणितशास्त्रानुसारेण ग्राह्यम्। यद्यपि धर्म्मिग्राहकादेव प्रमाणात्संख्यादयः सिद्धास्तथा
प्याकाशादिव्यवच्छेदार्थं विशेषगुणविरहमाह। विभुत्वे सामान्यगुणानाह। तस्य गुणाइति। अत्राप्येकत्वादिसमस्त
संख्यायोग सिद्धे विशिष्टपरत्वाद्यनुमेयस्य सतानेकत्वव्यवच्छेदेन नियततमेकत्वं विवदन्नाह। काललिङ्गाविशे

५६ षादिति। व्यापकतयैकस्यैव सर्वत्रस्त्र्यादिगत्युपनायकतयासन्निकृष्टविप्रकृष्टबुद्ध्युत्पादद्वारेणाविच्छवर्त्तिप ५६
रत्वापरत्वोत्पत्तौ निमित्तस्योपपत्तेरनेककालकल्पनायां कल्पनागौरवप्रसंगादित्यर्थः। तदनु विधानोद्देश्यत्वं
मित्येतदपि पूर्ववत्। कारणे काल इति वचनात्। कारणे काल आख्यात इति सूत्रकारवचनात्। परममहत्परिमाणात्। विशिष्टपर
त्वाद्यसाधारणकारणद्रव्यं विना विप्रकृष्टवर्त्तिमूर्त्तगतपरत्वाद्युत्पत्तौ स्त्र्यादिगत्युपाद्युपनयनाशक्तेः परममहत्व
भावे चैव तन्नवानुपपत्तेः परममहत्वं कालस्य सिद्ध्यतीत्यर्थः। कारणापरत्वादिवचनात् संयोगः। कारणापरत्वात् का
रणापरत्वाद्धि परत्वापरत्वे इति सूत्रकारवचनादित्यर्थः। कारणापरत्वादेः कालः। तस्य परत्वापरत्वे तदुत्पादकोऽमूर्त
संयोगादुपचारात्। तद्विनाशकाद्विभागः। तस्य संयोगस्योत्पत्तेः स्पष्टत्वात्। अथ विनाशको विभागस्तद्विनाशादेव सिद्ध से
इत्यर्थः। एतेन धर्म्मिग्राहकस्य प्रमाणस्य द्रव्यत्वस्य वा संख्यादिपञ्चकसाधकस्य सहायस्ते कोदर्शिता। तथा
ह्येकत्वाभावे द्वित्वाद्यसिद्धिरसमवायिकारणाभावात्। पृथक्त्वाभावे एकत्वानुपपत्तिर्व्यापकत्वाभावात्। द्वि
पृथक्त्वाद्यसिद्धिश्च परममहत्परिमाणाभावे चैव तन्नवानुपपत्तेः। संयोगासिद्धौ परत्वाद्यसिद्धिरसमवायिनिमित्तयोरभावात्

तयोरभावात्। विभागाभावे कार्यस्य संयोगस्य नित्यत्वप्रसंग इति। तस्याकाशवदिति। यथाकाशस्य धर्म्मिग्राहकप्रमाण
देवद्रव्यत्वं सिद्धं गुणवत्त्वादपि सिद्ध्यति। तथा कालस्यापि यथा चाकाशस्यैकत्वादेव नित्यत्वं सिद्धं। समानासमानजातीयकार
णाभावात् कार्यं तथापि सिद्ध्यति। तथा कालस्यापीत्यर्थः। स्यादेतत्। यद्येकः कालः कथमतीतानागतवर्त्तमानभेदेन व्यवह्रि
यते। नहि वर्णत्वादिवद्घटादिवद्वातीतादयोऽप्युपाधिभेदाः सन्ति किन्तु त एव भावाः। भावे वा त एव सन्तु कृतमन्तर्गडुनाकाले दु४
नेत्यत आह। काललिङ्गेति। अन्तसामुख्यया रच्यौ। प्रारम्भ इति संनिकृष्टप्रागभावमाह। क्रियेति। व्यापारमात्रनिर्वृत्तिरिति फल
५७ सिद्धिर्विरोध इति विनाश इत्यनेन प्रत्येकमनागतादि त्रिकं धर्म्मधर्म्मिभेदाद्द्विविधमुक्तं भवति। तथाहि भविष्यति पट इतिपट
स्य धर्म्मिणः प्रागभावोऽस्तिता भविष्यत्ता तदुपलक्षितः कालो भविष्यन्। पटेऽभाव यो भविष्यति कुविंद इत्यत्र तु धर्म्मिणो वर्त्तमान
त्वेऽपि पटोत्पत्त्यनुगुणो व्यापारप्रागभाववत्ता कुविन्दस्य भविष्यत्ता। तदुपलक्षितः कालोऽपि भविष्यन्। एवमुत्पद्यते पटः। समार
यति पूर्वेऽनुवृत्तेऽनु तमर्थमनुभावयति पूर्वकर्मस्वानुरूपं फलमिति धर्म्मिणामभावेऽपि व्यापारसत्ता वर्त्तमानता तदुपहि
तः कालोऽपि वर्त्तमानः। अस्त्यात्मा विद्यते घट इत्यादौ धर्म्मिसत्तैव वर्त्तमानता तदुपहितः कालोऽपि वर्त्तमानः। एवमन्यत् पटोऽकार्षी

५७ त्यद्भिन्नादौ धर्म्मे वस्थानेपि फलसिद्धौ तदुत्पादानुगुणव्यापारप्रध्वंसस्थितिरतीत उत्पन्नतदुपरक्षितः कालो प्यतीतइत्यु
च्यते। नष्टो घटइत्यादौ तु धर्म्मि स्वरूपनिवृत्तिरेवातीतत्वं तदुपलक्षितः कालोप्यतीतइति। न चैवं व्यवहारउपाधिमत्रैतो
वशक्यते। यदा भारतवर्षमध्याकृष्टस्तदोत्तरकुरुष्वर्द्धरात्रइत्यादौ संबंधाभावात्। बौद्धः सर्वं ध्रौव्यं विषयतीतिचेत्। सत्य
म्। तदर्थमेव तु निमित्तमनुसरामइत्यलं विस्तरेण। स एकोप्युपाधिभेदादनेकं व्यवहारमातनोतीत्यत्र दृष्टान्तमाह। मणि
२५ वदिति। यथा स्फटिकोरिकरूपोपि नीलपीताद्युपाधिभेदान्नीलः पीतइत्यादिव्यवह्रियते। तथा कालोपीत्यर्थः। तत्किं न
पौपीतादिव्यवहारवत्कालेपि गतानागतादिव्यवहारो भ्रान्तइत्याह। पाचकवदिति। न चौपाधिकइत्येतावतैव भ्रान्तो मा भूत्पा
चकादिव्यवहारोपि भ्रान्तः किंत्वतस्मिंस्तदिति न चैवं प्रकृतइत्यर्थः॥ ॥गुणपरत्वापरत्वलिङ्गत्वं दिशः स्फुटी भवि
ष्यतीति तन्निप्रायं वा स्तदुपेक्ष्य पूर्वापरादिप्रत्ययलिङ्गतामाह। दिगिति। एतदेव स्फोरयति। मूर्तेति। अमूर्तद्रव्यस्यावधि
त्वं नास्ति व्यापकत्वादत उक्तं मूर्तद्रव्यमेवावधिकृत्वेति। व्यापकत्वादेव तेषां परत्वापरादिप्रत्ययविषयत्वं नास्तीत्यत उक्तं मूर्तेष्वे
ति। पूर्वेणदक्षिणेनेत्यादौ तृतीया विधानप्रकृत्यादिभ्यउपसंख्यानमिति तृतीया। पूर्वं दक्षिणामित्यादावर्थेनाप्रत्ययेननि

भि

भिन्नं सिद्ध्यतीति। दिशस्तु कुतः सिद्धिरित्यत आह। अन्यनिमित्तासंभवात्। अन्येषां द्रव्यगुणादीनां व्यभिचारात्। प्रथमचरमा
घादित्यसंयोगाद्यत्र निमित्तं। न चैतद्दूरान्तरवर्त्तिनोद्रव्यान्तरे मूर्त्तेपसंक्रान्ताविशिष्टप्रत्ययानुत्पादयितुमीशते। ततो
त३ विशेषं परममहत्ता द्रव्यान्तरेण। न चाव्यापकसंबन्धमात्रेण्यस्य सूर्यसंयोगविशिष्टप्रत्ययानुत्पादयन्ति। न चाकाश
मानौ तथा न विलम्बमर्हतः पूर्वकादेवन्यायात्। कालो न विषयतीति चेत्। न। कालस्य क्रियामात्रोपाधिनिबन्धनव्य
वहारहेतुत्वात्। अन्यथा जगति वर्त्तमानाद्येकत्वव्यवस्था च प्रादेरप्येकत्वप्रसङ्गात्। अस्माकं प्राच्या एवान्येषां प्रतीचीत्यव।
न चैवं कालोऽन्यधर्म्मोपाधिकं व्यवहारमन्यत्र कुर्वाणः क्रमात् नियममपेक्षते। नन्वपेक्षत एव। योत्र दिवसस्तस्यान
न्तरा चिरत्वात्येन तु प्राच्याः सर्वान् प्रति प्रतीचीत्वं। तस्माद्विलक्षणो व्यवहारेणा विलक्षणमेव निमित्तमाकर्षणीयं
उपाधिरेव तथास्त्विति चेत्। न। सूर्यसंयोगस्य साधारणत्वात्। कथं तर्हि व्यवहारवैलक्षण्यमिति दिग्वादिनापि सम
मर्थनीयमितिचेत्। न। उपनायकत्वनावैलक्षण्येनैव तदुपपत्तेः। दिशो ह्ययं स्वभावो यदायत्तमात्वमेदमाश्रित्यै
वपरधर्मोपनायकत्वं न त्वन्यस्य। कालस्यैवं स्वभावाद्भेदः किन्न कल्प्यत इति चेत्। न। क्रियां प्रत्यन्यथादर्शनात्।
सबन्धव्यवहारमेतन्निर्व्वहन्तु वर्त्तमानादितथा वर्त्तमानस्य सर्वत्रवर्त्तमानैह।४८
ता

कि०या०ली

५८ अपिच। अन्यधर्म्मिमात्रमन्यत्रोपदर्श्य। दितिकालस्य स्वभावः। क्रियामात्रं वा। आद्ये सर्व्वधर्म्मिणस्तद्वत्त्रोपसंक्रा ५८
मयेदितिप्रतिप्रसङ्गः। द्वितीये संयोगोपधायकमन्यत्कल्पनीयं अन्यथा प्राच्यादिव्यवहारानुपपत्तेः। न चात्र क्रियास्वे
त्व३ योगयोरेकजातीयमस्ति यतोऽन्यत्रोपरुध्यातिहस्त्युपपद्यते। तस्मात् क्रियोपसंक्रान्तिरिव स्वविसंयोगोपसंक्रान्तिरपि निय
तस्वभावं द्रव्यमुपस्थापयतीति स्वकं मन्यनिमित्तासम्भवादिति। तत्सिद्धमेतत्। दिगिति स्थोऽभिधत्ते। उपाध्युपनयनद्वा
रेण पूर्व्वादिप्रत्ययहेतुः स्यात्। यन्नैवं तन्नैवं यथा पृथिव्यादीत्यादि। तद्गुणानाह। तस्या स्थिति। अत्रापि संख्यादीनां भक्ति
गाह्नकादेव प्रमाणात्सिद्धो द्रव्यत्वाद्वा विशेषगुणवत्त्वच्छेदतात्पर्यम्। तच्चोन्नयति। कालवदेते सिद्धा इति। यथा का
लल्लिङ्गाविशेषादेकत्वं तथा दिग्लिङ्गाविशेषादेकत्वम्। यथा तदनुविधानात् पृथक्त्वं काले तथा दिश्यपि। यथा कारणैक
त्व इति यच्च नात्परममहत्त्वं तथा दिश्यपि। यथा कारणतापरत्वादिवचनात्काले संयोगस्तथा दिश्यपि। यथा तन्नद्विनाश
कत्वोदिविभागस्तथा दिश्यपीत्यर्थः। यद्येकैव दिक् कथं दश दिश इति प्रसिद्धिरत आह। दिग्गेति। अजस्रामुत्पाद्यैत्ये
ति। परमर्षिभिर्निसर्गादि भवेर्म्मरीच्यादिनिर्द्दिश विधाः संज्ञाः कृताः। किमर्थं सृष्टिस्थिति लोकसंव्यवहारार्थं प्राची

प्रवर्त्तते वैश्वदेवेन यजेत। न प्रतीचीशिराः शयीत इति श्रौतो व्यवहारः। आयुष्यं प्राङ्मुखो भुङ्क्ते इत्यादिः स्मार्त्तः। दक्षि
णेन याहि इत्यादि लौकिकस्तदर्थं। ताः किं पारिभाषिक्यो नेत्याह। अन्वर्था। अनुगतार्थाः। केषां भगवतः सवितुर्ये
संयोगविशेषास्तेषां। किं न्वतस्य सवितुर्मेरुप्रदक्षिणमावर्त्तमानस्य परितो भ्रमतः। पुनः केषाम् अन्वर्था इत्यत आ
ह। लोकपालपरिगृहीतदिक्प्रदेशानां। लोकपाला इन्द्रादयः। कथं ताः सवितृसंयोगविशेषाद्यनुगमेन दश विधाः
संज्ञा इत्यत आह। प्राच्यादिभेदेन। तथा हि प्रथमम् अस्याम् अञ्चति सवितेति प्राची। प्रत्यगुदीची। उदक् प्राची। सूर्य्यापेक्षया यतः पृ
थिवी साधस्तात्। पृथिव्यपेक्षयोर्ध्वा न क्षत्रालीसोऽर्द्धा। ततो लक्ष्यो पचारेण दश दिशः सिद्धा इत्येकत्वाविरोध इत्यर्थः। ननु लोक
पालपरिग्रहनिबन्धनिर्द्देशनिःसहजस्यापि किरातादिदेशः परिस्फुरन्तीत्यत आह। तासामेवेति। येवास्माकं प्राची सैवमाह
ईति निमित्तमात्रं भिद्यते न तु नैमित्तिकमित्यर्थः। उपलक्षणं चैतत्। पूर्व्वापरादि संज्ञा सूचितत्समाप्ताश्च्यानन्त्विन्नाम्नीइति
न क्वापि दशैव दिश इति॥ ॥उद्देशक्रमानुसारेण दिग्लक्षणानन्तरमात्मलक्षणमाह। आत्मत्वेति। आत्मत्वं नाम सामा
न्यविशेषस्तदभिसम्बन्धात्। आत्मेतरेभ्यो भिद्यत इति व्यवच्छेदार्थोऽयम्। ननु न शरीरादतिरिक्त आत्मा न मुपलभ्नाम

अवागस्यामञ्चतीत्यवाची। प्रतीपमस्यामञ्चतीति प्रतीची। उदगस्यामञ्चतीत्युदीची। एवं प्रागवाची। अवाक्प्रतीची।

मनवस्थाप्रसंगात्तथा कस्यचित्कारणस्य कर्त्रपेक्षायां अपेक्षत्वेपि न सर्वं तथा भविष्यतीति को विरोधः। उच्यते। कारकेषु स
मानजातीयकारकापेक्षानियमो नेष्यते अनवस्थाप्रसङ्गात्। विजातीयकारकापेक्षानियमस्त्विष्यत एव [illegible] यथाल आन्द२
क्षणव्याघातात् चक्षुरादीनां च कर्त्रपेक्षत्वे च तत्साध्यक्रियाप्रतिसंधानानुपपत्तिप्रसङ्गात्। तस्माद्यो सौ श्रोत्रा
दीनामेकोधिष्ठाता स आत्मेति। प्रमाणांतरमाह। शब्दादिष्विति। प्रसिद्ध्या ज्ञानेन। प्रसाधकोज्ञाता। तथा हि ज्ञानं क्वचि
दाश्रितं कार्य्यत्वाद्घटवत्। कार्य्यत्वमेषामनुत्पन्नानां विलक्षणत्वेनास्य च सिद्धम्। कार्य्यस्याप्यनाश्रितत्वे समवायि
कारणव्यावृत्त्या विरयोरपि व्यावृत्तेरकारणकत्वप्रसङ्गः। तथापि शरीरेन्द्रियमनसामन्यतमस्मिन्नाश्रितं न विष्य
तीत्यत आह। न शरीरेन्द्रियमनसामिति। चैतन्यमित्यग्रेन विष्यतीति। कुतः। अज्ञत्वात्। अज्ञत्वव्यावृत्ततयैव तेषां सिद्धत्वादि
त्यर्थः। एतदेव दर्शयति। न शरीरस्य चैतन्यम्। न शरीरं चैतन्याश्रयमित्यर्थः। घटादिवद्भूतकार्य्यत्वादिति। भूतत्वा
कार्य्यत्वाद्वेत्यर्थः। अन्यथा समस्तविशेषणो हेतुः स्यात्। ननु चैतन्याश्रयत्वेन भूतत्वस्य कार्य्यत्वस्य वा को विरोधोऽत
आह। मृतेचासंभवादिति। यदि हि शरीरविशेषगुणश्चैतन्यं स्याद्रूपादिवद्यावद्द्रव्यभावि स्यात्। चक[illegible]यावल्द

कि०णा०व्ली

५९ हं। गौरोहं स्थूलोहं ब्राह्मणोहं मानुषोहं गच्छाम्यहं तिष्ठाम्यहं जातोहं पितुः पुत्रः पुत्रस्य पिता ज्येष्ठस्य कनीयान्क ५९
नीयसो ज्यायानिति गुणकर्मसामान्यविशेषजन्माद्यधिकरणमात्मानं चक्षुरादिभिर्वेद्यं सर्वः प्रत्येति। न त्वस्तूपं विभुमच
लमनन्तमजमप्रबुद्धमपरमात्मानं क्वचित्स्यस्य अप्यनुभवतीत्याश्रयासिद्धमात्मत्वम्। यथाप्रसिद्धाश्रयेपि व्याहि च३
तार्थः। यद्यप्यहं जानेयतेऽहं उदेति ज्ञानाद्यधिकरणतया मनसात्मानुभूयत एवाहंकारस्य शरीरादिविषयत्वे पोये नि
षेत्स्यत इत्यभिप्रायः। तथाप्यात्मत्वं स्वरूपासिद्धं परात्मनोऽप्रतीतेर्यक्ते नैव सिद्धो सामान्यविशेषासिद्धिरित्यत आ
ह। तस्येति। सोस्यमिन्द्रियग्रहणायोग्यतादिरूपः। तस्मादप्रत्यक्षत्वे तस्य करणैः श्रोत्रादिभिः समधिगमः क्रियते। न
नु करणान्यप्रत्यक्षाण्यपत आह। शब्दाद्युपलब्ध्यनुमितैः। शब्दाद्युपलब्धयः करणसाध्याः क्रियात्वाच्छिदि
क्रियावदित्यनुमितैः। कथं पुनः करणैरात्मा समधिगम्यत इत्यत आह। वास्यादीनामिति। अनेन व्याप्तिर्दर्शिता। प्र
योगस्त्वेवम्। श्रोत्रादीनि कर्त्रधिष्ठितानि करणत्वाद्वासीवत्। करणत्वं चामीषां धर्म्मिग्राहकप्रमाणसिद्धम्। न
नु कस्यचित्करणस्य [illegible] वास्यादेः पाणाद्यादिकरणाप्रयोज्यत्वदर्शनेपि यथा न सर्वं करणं करणप्रयोज्य

६० पृथिव्यादिव्यक्तिर्व्यक्तिर्भवेत् । पृथिव्यादिशरीरविशेषगुणास्य यावद्द्रव्यभावित्वनियमात् । पृथिव्यादिचतुष्टय ६०
विशेषगुणानां स्य च यावत्पृथिव्यादिव्यक्तिभावित्वात् । अत्राप्यनिर्मोको विरोध इति चेत् । शरीरस्य कार्यतयोत्प
त्तेः प्रागनुभवाभावेन संस्काराभावात् स्मृत्यनुसंधानानुपपत्तिरित्येतत्तर्कप्रदर्शनार्थमेव कार्यत्वस्यो
पादानमित्यवधातव्यम् । नेन्द्रियाणां चैतन्यमित्यनुवर्त्तते । कुतः । करणभावात् । कुठारादिवदिति शेषः । तर्क
माह । उपहतेष्विति । अनुभवानुविधायितया तावदनुभवकार्या स्मृतिः । सापि यद्यन्तराकं चिदतिशयं ना
दध्यात् चिरध्वस्तो न स्मृतिं जनयेत् । अनुत्पन्ननिरन्वयध्वस्तयोरविशेषात् । अतिशयमप्यादधानः स्व
समानाश्रयमेवादधीत । अन्यत्राधानेतिप्रसङ्गात् । तस्मात् स्मृतिसंस्कारानुभवाः समानाश्रया इति नियमः
। तथा चेन्द्रियेषु चैतन्याश्रयेषु स्वीक्रियमाणेषु तेषामुपघाते न्धादिभिः पूर्वमनुभूतानां रूपादीनामस्म
रणप्रसङ्गः । घटादीनां विषयाणां कुठारादीनां च करणानामचैतन्ये जीवे विरुद्धो हेतुः । तत्राप्याध्यात्मिकवायु

विरुद्धः । तत्रापि बाह्यस्य धात्रुपग्रहाभावः । तत्रापि दृष्टान्तादेरभावः । अत्रार्थे तर्कं सूचयति । विषयासान्निध्ये चेति । यदि
हि विषयाश्चेतयेरन् । तेषामसन्निधावनुस्मृतिर्न स्यात् । असन्निधिश्च नाशहेतुको द्रष्टव्यः । न ह्यसत्यनुभवि
तरि स्मरणमुपपद्यते कारणाभावादिति भावः । अनुभवात्पश्चाद्भाविन स्मृतिरेवानुस्मृतिरुच्यते । अस्तु त
र्हि नित्यत्वात्सर्वविषयत्वाद्व्यत्वाच्च मनसश्चैतन्यमत आह । नापि मनस इति । अयमभिसंधिः ज्ञानाश्रय
तया मनोनुमीयमानं कर्तृस्यान्न तु कारणं तथा च युगपदनेकविषयसन्निधावनेकचक्षुरादिकरणाधिष्ठा
नेन युगपदनेकान्यालोचनान्यनेकाश्च स्मृतीरारभेत । न हि करणवत् कर्तुरप्ययं धर्मो यदेकदेकमेव वृत्ति
यामभिनिवेशयति । तथा च व्याप्यासंगो न स्यात् । करणान्तरापेक्षायां च संज्ञाभेदमात्रं । अथ करणतयैव तदनुमा र
नेज्ञानाश्रयतया तदनुमास्यत इत्यत आह । स्वयं करणाभावाच्चेति । सिद्धे हि चैतन्याश्रये कर्त्तरि करणं मनोनुमी
यते । तथा च धर्मिग्राहकप्रमाणबाध इति भावः । दिक्कालाकाशानां च प्रसक्तिरेव नास्ति । तेषां बुद्ध्याश्रयत्व

नचवतित१नाश्रितत्वेससि१

कि०ए०ली

६१ तिङ्गेपीतोवशब्दादिनिरूपस्यानात्। अतः पारिशेष्यात्सङ्गप्रतिषेधे अन्यत्राप्रसङ्गात् शिष्यमाणतयात्म
कार्यत्वात्पृथिव्याद्यसमवायित्वे सति कार्यत्वादित्यर्थः। तदयं प्रयोगः ज्ञानं पृथिव्याद्यतिरिक्तद्रव्याश्रितं ६१
तदनाश्रितत्वे सति कार्यत्वात्। यत्पुनः पृथिव्याद्यतिरिक्तद्रव्याश्रितं तत् कार्यमपि न भवति यथाकाशादिरिति केवल
व्यतिरेकीति। स्यादेतदात्मत्वहेतुसिद्ध्यर्थं परात्मप्रसाधनार्थं जायमानं नोपपद्यते परात्मा परोक्षः तथा च तत्र बु ति३
द्धिरपि परोक्षैव तथा किं केन साध्यत इत्याशङ्क्याह। शरीरसमवायिनीभ्यामिति। विग्रहस्याधिष्ठाताऽनुमीयते।
अधिष्ठातेत्यस्य विवरणं प्रयत्नवानिति। संयोगीति शेषः। लिङ्गमाह। प्रवृत्तिनिवृत्तिभ्यामिति। प्रवृत्त्या च निवृत्त्या चे
त्यर्थः। अनयोः प्रत्येकमेव लिङ्गत्वात्। क्रियामात्रस्य चानैकान्तिकत्वमाशङ्क्याह। हिताहितप्राप्तिपरिहारयो
ग्याभ्यामिति। हितं सुखसाधनं अहितं दुःखसाधनं। तयोर्यथासंख्यं प्राप्तिपरिहारौ तद्योग्याभ्यामिति। योग्यग्रहणं
क्वचिदन्तरायसंभवे पि प्राप्तिपरिहारयोरसिद्धावपि चेष्टात्वस्य जीवोत्पत्तिप्रयोजकत्वमादर्शयितुम्। एवं च तेन

प्रवृत्तिनिवृत्ती प्रायेण शरीरतदवयवसमवायिन्याविति शरीरसमवायिनीभ्यामिति स्वरूपमुक्तम्। यथा च तत्र
तादीनामपि शरीरत्वं तयोः क्रमयस्तावद्भ्यते च। अत्र दृष्टान्तः रथकर्म्मणा सारथिरिवेति। अत्र प्रयोगः। विवादाध्यासि
तं शरीरं प्रयत्नवदधिष्ठितम्। हितप्राप्तियोग्यक्रियावत्त्वात्। अहितपरिहारयोग्यक्रियावत्त्वाद्वा रथवत्। विपक्षे प्रयत्न
वद्व्यतिरेकेण प्रवृत्त्यनुत्पत्तिप्रसङ्गस्तत्कार्यत्वादिति। प्राणादिभिश्चेति। अत्र [illegible] प्राणापाननिमेषोन्मेषमनोगतीन्द्रि जीवन४
यान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानीति सूत्रं स्मारयति। कथमिति। केन प्रकारेणात्रव्याप्ति
द्येत्यर्थः। उत्तरम्। शरीरेति। लिङ्गत्वमभिव्यनक्ति। विकृतेति। शरीरपरिगृहीतः शरीरान्तश्चारी मरुत् सञ्चरन् ५
यावत्। तस्मिन्विकृतं तस्य भावः सिद्धं तिर्य्यक्पवमानः न्यादशाकर्म्मोर्द्धाधोगतिलक्षणम्। तस्य दर्शनादिति व्याप्ति
ग्राहकं प्रमाणमुक्तम्। भस्त्राध्मायितेवेति च दृष्टान्तः। प्रयोगस्त्वेवम्। जीवच्छरीरं जोत्कृत्प्रयत्नवदधिष्ठित
सम्बन्धेनोनावस्तितिविकृतक्रियापवनाश्रयत्वात्। भस्त्रादिवत्। अथवा शरीरो वायुर्नोत्कृप्रयत्नवतेरितः अ

६२ स तिमत्त्वं मूर्छने विकृतक्रियावायुवात्। भस्त्रावायुवत्। लिङ्गान्तरं विवृणोति। निमेषेति। अक्षिपक्ष्मणोः संयोगहे-
तुः कर्म निमेषः। विभागहेतुरुन्मेषः। तेनापि प्रयत्नवाननुमीयते। नन्वेतद्वातविकारजनितेन नयनस्पन्दने- ६२
नानैकान्तिकं अत आह नियतेनेति। दृष्टनियमेन यादृच्छिकनिमेषोन्मेषकर्मप्रयत्नवदन्वयव्यतिरेकानुविधायिदृ-
ष्टान्तदर्शनेनेत्यर्थः। अथ किमिदं तादृशत्वम्। इच्छापूर्वकत्वमिति चेत्। न। तस्याप्य[illegible]त्वात्। सत्यम्। प्रपञ्चार्थ-
तूपन्यासः। अत्रापि प्रयोगः। जीवच्छरीरं प्रयत्नवदधिष्ठितं विशिष्टनिमेषोन्मेषक्रियावत्त्वात्। दारुयन्त्रवत्। वि-
मौ ५ शिष्टं वा निमेषोन्मेषकर्म प्रयत्नवत्पूर्वकं विशिष्टनिमेषोन्मेषकर्मत्वात्। दारुयन्त्रनिमेषोन्मेषकर्मवत्॥
जीवनलिङ्गकमनुमानमाह। द्वेरुस्येति। वृद्धिरवयवोपचयः। भग्नक्षतयोर्विघटितविश्लिष्टयोरस्थिपक्ष्मो-
मांसभागयोः संरोहणं संवर्द्धनम्। तयोर्निमित्ततयाधिष्ठातानुमीयते। शरीरावयवानां वृद्धिक्षतसंरोहणे
प्रयत्नवन्निमित्तके वृद्धित्वात्संरोहणत्वाच्च गृहेकुड्यवृद्धिवत्। तत्संरोहणवच्चेति। सूत्रे च जीवनशब्दो जी-

कृतया साध्य
व्याप्य इत्याहित
प्राप्तिपरिहारार्थं
वस्याविवक्षित
त्वात्। दृष्टप्रवृत्ति
निवृत्तिभ्यामेव
मनार्थ[illegible] ४

वनकार्ये वृद्धिसंरोहणे लक्षयति। सुखातो हि स्वकर्मोपार्जितशरीरावच्छिन्नेनात्ममनसः संयोगो जीवनमिति॥
क्वचित्संरोहणादीत्यादिपदं श्रूयते। तेनाहारोपादानमलोत्सर्गौ गृह्येते। तथाहि जीवच्छरीरं प्रयत्नवदधिष्ठितम-
भिमतानभिमतोपादानोत्सर्गवत्त्वात्। यन्त्रधारागृहवदिति। नन्वेतद्वात्यादिगतवृक्षादिनानैकान्तिकम्। तत्रा-
पि नोक्तविशेषाधिष्ठितत्वस्य स्पष्टत्वादिति। लिङ्गान्तरमाह। अभिमतेति। अभिमतो विषयो रूपादिस्तद्ग्राहकं करण-
चक्षुरादि तेन संबन्धः संयोगस्तस्य निमि[illegible]कारणं यन्मनःकर्म तेनात्मानुमीयते। गृहकोणेषु व्यवस्थितो गृह-
कोणव्यवस्थितमेव पेलकमुद्दिश्य पेलकस्य जतुगुलकस्य प्रेरको दारको बालकस्तद्वदिति। अयमाशयः। प्रय-
त्नज्ञानायोगपद्यान्मनस्तावत्प्रतिशरीरमेक[illegible]मणुमिति च सिद्धम्। तस्य स्वाभि[illegible]ह्यात्र युज्यते। मनः प्रयत्न-
वदधिष्ठितम्। गुरुत्वद्रवत्वादिकारणान्तराभावे सति गतिमत्त्वात्। दारकप्रेरितपेलकवदिति। अदृष्टोपग्रहा-
देव तत्र क्रियास्यादिति चेत्। क्वचिदेवमपि। यद्यप्येवमप्यात्मसिद्धिस्तथापि [illegible] निमित्तेत्यादिनादृष्टात्तु विधायिन
ः कर्मणो लिङ्गत्वेन विवक्षितत्वात्। प्रयत्नवदधिष्ठानसिद्धिः। यद्यपि चज्ञातमिच्छयाविषयी क्रियते दुःखी

६३ विषयाश्च प्रयत्नगोचराः स्यात्। मनस्त्वीन्द्रियं सदज्ञातं कथमेवं नाधिष्यतीति। तथापि स्पर्शनेन्द्रियेणारसम ६३
न्तधातुदोषवहनाडीवन्मनोवहानां नाडीनामनुपलम्भात् तज्जोचरापि च्छा प्रयत्नावद्दूरविप्रकर्षेणा तदपि व्याप्नु
तद्युच्यते। अदृष्टस्य नियामकत्वाद्यत्रैव तदा तत्र प्रयत्नस्तत्त्वम्। नहि ज्ञालाद्यन्यवहरणे हेतवो मलाद्युत्सर्गहेत
वो वा नाड्यश्चक्षुषोपलभ्यंते। न वा तदधिष्ठानप्रयत्नः। अन्नाद्यन्यासवासनावशादृष्टविशेषनियमात्तु
स्पर्शनप्रत्यक्षमेव तत्र कारणमेषितव्यम्। तथा प्रकृतेपीति। इन्द्रियान्तरविकारं विवृणोति। नयनेति। नयन
स्य चक्षुषो विषयश्चिञ्चिरवित्वादिरूपं तस्यालोचनं ग्रहणान्तरस्यानन्तरं रसस्यानुस्मृतिस्तदनंतरं व्याप्तिस्मृ
तिस्तदनन्तरं तथाविधरसानुमानमित्यनेन क्रमेणेन्द्रियान्तरस्य रसनस्य विकारो दन्तोदकसंप्लवलक्षणः।
तस्य दर्शनादुन्नयदर्शी अनुमीयते। उनोन्यामुन्नयं दृष्टुं शीलमस्येत्युन्नयदर्शी। अनेककगवाक्षान्तर्गतप्रेक्ष
कवदिति। प्रयोगस्तु। नयनादीन्द्रियं न चेतनम्। नियतविषयत्वात्। गवाक्षवत्। यद्वा चेतनं नियतविषयेन्नो

यथा३

न्नियतो प्रतिसंधानत्वात्। गवाक्षस्य गवाक्षदर्शिवदिति। अन्यथान्येन दृष्टस्यान्येनास्मरणात्प्रतिसंधा
नानुपपत्तौ इन्द्रियानुपपत्तेर्विकारानुपपत्तिः कारणाभावादिति। ननु जस्त्रादिषु सर्वत्र प्रयत्नवानधिष्ठाता शरी
रिरूप उपलब्धस्तथा च सिद्धदृष्टान्तबलेन विग्रहस्यापि तथा त्वत एवाधिष्ठातानुमातुमुचितः अनवस्था
नियानेव मिति चेत्। तर्हि विग्रह एव प्रयत्नवानस्तु कृतं ततोप्यधिके नाधिष्ठात्रेति। न प्रतिसंधातुस्तथा भाव
त्। शरीरस्य तु भेदेन तथाभावानुपपत्तेः। तस्य नूतत्वकार्यत्वादिना प्रागेव चैतन्यप्रतिषेधात्। प्रतिषेत्स्यमा
नत्वाच्चेति। एवं कार्येणकारणमनुमाय गुणेन गुणिनमनुमिनोति सुखेति। तथाहि सुखादयो द्रव्याश्रिताः गुण
ति३ त्वाद्रूपवदिति प्रयोगः। अनाश्रितत्वे द्रव्यान्यत्वे चाश्रितत्वे वा गुणत्वव्याघातात्। सिद्धं च गुणत्वमेषां कार्यत्वे सति अ
व्यापकत्वे सति एकेन्द्रियग्राह्यत्वाद्रूपादिवत्। कार्यस्य द्रव्यत्वे निरवयवत्वामूर्तत्वव्याघातात्। कर्मत्वे संयो
गविभागानपेक्षकारणत्वप्रसङ्गात्। सामान्यादित्वे च लक्षणव्याघातादयस्तर्का ऊहनीयाः। नवत्वमीषा

६४ गुणानामाहङ्कारव्याश्रितत्वं तथापि शरीराश्रितत्वमिन्द्रियाश्रितत्वं वा न विरुध्यतीत्यत आह तेचेति। कस्मादिति
शिष्यस्याकांक्षोत्थां हेतुमाह। अहंकारेणैकवाक्यभावात्। सामानाधिकरण्येनावगतेरित्यर्थः। योऽहं सुख
साधनस्रक्चन्दनादिकमुपलब्धवान् तदुपादित्सुः प्रयतमानस्तदुपात्तवान् सोऽहं सुखी योऽहं दुःखसाधनमहिकं
टकाद्युपलब्धवानपि न परिहृतवान् सोऽहं दुःखी योऽहं सुखं दुःखं वानुभूतवानस्मि सोऽहं तत्साधनमुपलभ्याद्य
स्मि सोऽहमिदानीं च स्मरामीत्यनेन क्रमेण प्रतिसंधीयमाना। खल्विमे गुणाः सुखादयोऽनुभूयन्ते। इदं च प्रतिसंधीयमा
नममीषां भिन्नाश्रयतया विरुध्यते। चैत्रमैत्रसुखादिषु प्रतिसंधानादर्शनात्। तथा च शरीरेन्द्रियाणामपि प्रत्य
क्षं परिणतिभेदेन भिन्नत्वात्। तद्गुणानाममीषामप्रतिसंधानप्रसङ्गः। भिन्नाश्रयाणामपि वा प्रतिसंधाने चै
त्रमैत्रगुणानामपि संधानापत्तिः। ननु शरीरगुणा अपि प्रतिसंधीयन्त एव। तद्यथा। योऽहं गौरः स्थूलः सोऽहं स्वप्ना
न्ते सोऽहमिदानीं श्यामः कृशो दीर्घ इति। न। तस्य भ्रान्तत्वात्। प्रकृतमपि संधानं भ्रान्तमेव भविष्यतीति किं नश्छिन्न

५४

मिति चेत्। न। स्मर्तुरभ्रान्तेः। अन्येन दृष्टस्य चान्येनास्मरणात्। अन्यथातिप्रसङ्गात्। तस्मात्प्रतिसंधातुर्देहादि
न्योऽन्यस्य सिद्धेस्तदधिकरणत्वे च सुखादीनामनुभूयमाने प्रयोगः। सुखादयो न शरीरेन्द्रियगुणा अहंकारे
णसमानाधिकरणत्वात् स्मृतिवदिति। स्यादेतत्प्रतिसंधानबलेन स्मृतिबुद्ध्योर्देहाद्यनधिकरणत्वं सिद्ध्यतु।
देहादीनां भेदेन प्रतिसंधातुं स्मर्तुं चासमर्थत्वात्। सुखादयस्तु गौरत्वादिवद्देहधर्मा एव। भ्रान्तिवशादहंकारसमा
नाधिकरणतया प्रतिसंधास्यन्त इति चेत्। न। ज्ञानेन भिन्नाधिकरणानां कार्यकारणभावनियमानुपपत्तेः। न
ह्यन्यो जानात्यन्यदिच्छत्यन्यः प्रयतत इति संभवति। तथा ह्येव चैत्रेणेष्टे मैत्रश्चेष्टितः स्याद्वा प्रयतेत वा। तस्मा
देकाधिकरणत्वेनैवामीषां कार्यकारणभावनियमो नान्यथेति। हेत्वन्तरमाह। प्रदेशवृत्तित्वादिति। देहाद्यव्याप
कत्वादित्यर्थः। प्रयोगस्त्वेवम्। सुखादयो न स्पर्शवद्विशेषगुणाः। तदव्यापकत्वात्। ये तु न स्तद्विशेषगुणास्ते तद्व्या
पकाः यथा रूपादय इति व्यतिरेकः। यद्वा संयोगवदित्यन्वयः। हेत्वन्तरमयावद्द्रव्यभावित्वादिति। सर्वथैवास्पर्शवति

६५ द्रव्येणनिवर्त्तमानत्वादित्यर्थः। ये पुनः स्पर्शवद्विशेषगुणास्ते यावद्द्रव्यभाविनो भवन्ति यथा रूपादय इति व्यतिरे ६५
कः। संयोगवदिति पूर्ववदन्वयः। अनयोस्तर्कः। यदि स्पर्शवद्विशेषगुणा भवेयुस्तर्हि नियतबुद्धिकार्य्या भवेयुर्बुद्धियाग्र
काभावात्। विषयविषयिभावस्य नियामकत्वे चेत्रस्य बुद्ध्या मैत्रविषयिण्या मैत्रसमवेते च्छाद्युत्पादनप्रसङ्गादिति।
स्यादेतत्। तथापि न ज्ञाप्यं हेतुभागमिंद्रियगुणत्वममीषां निषिद्धम्। शब्देन व्यभिचारात्। नहि शब्दो यावद्द्रव्यं ना
५५ पि श्रोत्रं व्याबर्त्तते। निमित्ताभिमुख्येन तत्र तन्निमित्तमपेक्ष्योत्पत्तेः। अन्यथा प्राच्यां शब्दः प्रतीच्यां शब्द इति प्रत्य
सोऽनुपपत्तेः। इत्याशंक्य हेत्वंतरमाह। बाह्येन्द्रियाप्रत्यक्षत्वादिति। मानसप्रत्यक्षत्वादित्यर्थः। न शरीरेन्द्रियगुणाः
सुखादयो मानसप्रत्यक्षत्वाद्बुद्धिवत्। ज्ञानवैयधिकरण्ये ऽमीषामप्रत्यक्षत्वप्रसङ्गः। तथापि प्रत्यक्षत्वे चेत्रे
णामैत्रसमवेतानामिच्छादीनामुपलंभापत्तेः। शरीरादिगुणानाममीषां च सुरादिग्राह्यत्वे ऽन्धादिभिरनुप
लंभप्रसङ्गः। मनोग्राह्यत्वे च तद्धर्म्माणामंधादिभिरपि रूपाद्युपलंभापत्तेः। इन्द्रियसामर्थ्यनियमात् स्व

परस्यादिवत् विषयनियमो भविष्यतीति चेत्। न। मनसः सर्वविषयत्वात्। नियतबाह्यविषयत्वे च मनस्त्वव्याघातादि
ति। अहंयुवा कामीयते सुखी दुःखी स्पर्शनसुखो वायुः कर्णे कटुरटति मनो मे दुःखितं मनसि मे हर्षः पादे मे सुखं शिर
सि मे वेदनेत्यादिप्रत्ययात् शरीरेंद्रियगुणत्वममीषां शंकास्पदमिति तदेव प्रतिषिद्धम्। अन्यगुणत्वे तु शंकैव नास्तीत्यु
पे क्षितवान्। संप्रति पूर्वहेतूनां चेष्टादीनां रथकर्म्मणा सारथिवदित्यादिदृष्टांतेषु विशेषविरोधाभासपरिहाराय
प्रत्यक्षसिद्धं पृथिव्याद्यतिरिक्तं स्वात्मानमेव दृष्टांतयिष्यामि इत्यभिसंधाय प्रत्यक्षमाह। तथाहंशब्देनेति। शब्द
न प्रत्ययमुपलक्षयति। यथा परात्मानुमीयते तथा प्रत्यक्षोऽप्यहंप्रत्ययेनात्मा विषयीक्रियत इत्यर्थः। न ह्ययमहंप्रत्य
यो लिंगजः शब्दो वा तदनुसंधानमंतरेणैव जायमानत्वात्। ननु पृथिव्यादिविषय एवायमहंप्रत्ययो भविष्यतीत्या
शंक्य तर्कमाह। पृथिव्यादिशब्दव्यतिरिक्तादिति। पृथिव्यादिप्रत्ययवैयधिकरण्यादित्यर्थः। यदि ह्ययमहंप्रत्ययः पृ
थिव्यादौ भवेदहं पृथिवी अहमापः इत्यादिरूपो भवेद्द्रव्यप्रत्ययवत्। न चैवं। स्यादेतत्। सामान्यतो मा भूद्विशेषतस्तु भ
विष्यति। यथा कश्चित्पार्थिवो गौर्घटादिर्न तु सर्वस्तथा कश्चित्पार्थिवोऽहमित्ययं इति को विरोधः। न। अहंकार

सं२   प्र४   कि०ता०

६६ स्यप्रतिसंधानाविषयत्वात् । शरीरस्य च नेदेनाप्रतिसंधानत्वादित्युक्तत्वात् । तन्मूलत्वपरमाणावःस्थि ६६
रत्वाप्रतिसंधानत्वेन्नाहंकारविषय । न विषयतीतिचेत् । न । तेषामतीन्द्रियत्वात् । अपि च शरीरस्यागोचरत्वे प्र
स्य बाह्येन्द्रियजन्यमापद्येत । तथा च चक्षुरादिव्यापारोपरमे ऽहमिति प्रत्ययो न स्यात् । मानसत्वे वा शरी
रस्य तद्गुणानां गौरत्वादीनामपि मानसत्वप्रसंगः । नहि निर्गुणं द्रव्यमुपलभ्यते । तथा च गौरादीनां रूपादि
वद्बहुं प्रत्ययानुपपत्तिरिति । तस्मात्परमार्थतः सामान्यतो विशेषतश्च सकलदृष्टपिंड्यादिप्रत्ययव्यतिरेका
दहंप्रत्ययस्तदतिरिक्तं द्रव्यमालंबते । तथा च चेष्टादीनां हेतुत्वेनात्मकार्यत्वे सिद्धे परत्रापि तत्सिद्धिः । रथ्या
वदित्यादौ न शरीरवदित्यादिर्दिग् विपरिणामे नोदाहरणस्य निरूपद्रवत्वादिति सर्वमवदातम् । तस्मात्तदेतद्धेनादि
के रूपकस्यते बुद्धेर्हि कार्यस्य यच्चोपादानकारणमात्मा विवक्षितः स एव नो बुद्ध्यंतरम् । अथ सुखादी
नां गुणानां मा ऽस्त्वयोद्रव्यत्वदपि प्रक्रियामात्रं । सहिताकत्वसिद्धावस्य षद्पदार्थीकाव्यस्य बालबाल

कं१   म२   प्रस्तो

नार्थित्वात् ॥ ॥ तथाहि । यत्सत्तत्क्षणिकं यथा घटः संश्च विवादाध्यासितः शब्दादिरिति । सत्वं तावद्यत्किंचिदस्तु ते
नावदर्थक्रियाकारित्वं बौद्धस्य विवक्षितम् । तच्च भावानां प्रत्यक्षसिद्धम् । व्याप्तं च क्रमयौगपद्याभ्याम् । नहि
क्रमाक्रमाभ्यामन्यः प्रकारः शंकितुमपि शक्यते व्याघातस्योद्भटत्वात् । न क्रम इति निषेधाद् वाक्रमाभ्युपगम
त् । नाक्रम इति निषेधाद्वक्रमोपगमात् । अभ्युपगमे च प्रतिक्षेपो व्याहन्यत इति । तौ च क्रमाक्रमौ स्थिरस्य सन्न
वार्तावदर्थक्रियामपि ततो व्यावर्तयतः । वर्तमानार्थक्रियाकरणकाले ह्यतीतानागतयोरप्यर्थक्रिययोः समर्थत्वे
तयोरपि करणप्रसंगादसमर्थत्वे तु पूर्वापरकालयोरप्यकरणापत्तेः । सहकार्यपेक्षणीयात्सन्निधेर्न करोतितत्स नि
धेस्तु करोतीति चेत् । अथ किमर्थं सहकारिणामपेक्षा । किं स्वरूपलाभार्थमुतोपकारार्थमथ कार्यार्थम् । न प्रथ
मः । स्वरूपस्य स्वकारणाधीनस्य नित्यस्यैव पूर्वसिद्धत्वात् । न द्वितीयः । स्वयं सामर्थ्ये ऽसामर्थ्ये वा तस्यानुपयो
गात् । सामर्थ्ये हि स्वयमेव कार्यं कुर्यात् । किं तेन । असामर्थ्ये उपकारसहस्रेणापि न कुर्यात् तथापि किं तेन ॥ ३३२
अत एव न तृतीयः । उपकारिवत्सहकारिणामप्यनुपयोगादिति । अनेकाधीनस्य जनकतया कार्यमेवापेक्षितमिति

नू२

६७ त्वात्। न। नस्याः स्वतंत्रत्वात्। स्वातंत्र्ये वा कार्य्यत्वव्याघातात्। तद्धि तत्साकल्येपि स्यात्तंत्र्याद् एवं न भवेदिति। अ
थवा केयमपेक्षा नाम किं तैः सह करोतीत्यन्वयपर्य्यवसन्नः स्वभावभेदः। अथ तैर्विना न करोतीति रेकनिष्ठं
स्वयमेव। आक्रोशितैरुपकृतः करोतीत्युपकारभेदः। न प्रथमः। स्वभावस्य तादवस्थ्यात्। न चास्य सहकारि
वाधृतौ स्वभावव्यावृत्तिः। नन्वत एव सहकारिव्यावृत्तावस्य स्वभावो न व्यावर्त्तते। अत एव ते र्विना न करो
तीति। कुर्वाणो हि तैः सहैव करोतीति स्वभावं जह्यात्। स तर्हि स्वभावभेदः सहकारिसाहित्ये सति कार्य्यका
रणानियमः सहकारिणो न जह्यात्। प्रत्युत पलायमानानपि गलेपाशेन बध्वानयेत्। अन्यथा स्वभावक्षति
निप्रसंगात्। अत एव न द्वितीयः। अकर्तृस्वभावापरावृत्तेः। अथ तद्विरहे कर्तृस्वभावः स्यात्। कालांतरेपि
स्व हेतुवशादुपसर्प्यतोपि सहकारिताः परान्तुभ्रमं न कुर्वीत। तद्विरहे कर्तृशीलः खल्वयमिति। अथ सहकारि
षु सत्सु कर्तृस्वभावः तद्विरहेऽकर्तृस्वरूपद्वयनिपायः। विरुद्धधर्म्माध्यासस्तर्हि निमित्तं निर्घात्। न

द२ द३

चायं कालभेदेन परिहर्त्तव्यः। धर्म्मिणोऽनतिरेकात्। अतिरेके वास्योदासीन्यापत्तेः। तथा हि सामर्थ्यासामर्थ्ये
न्या अन्यो धर्म्मी स्वरूपेण न किंचिदेव स्यादिति। उपकारपक्षे स्वनेकमुखानस्यादुस्यतया नोपन्यासस्यापि
योग्यः। तथा ह्युपकारेपि कर्त्तव्ये सहकार्य्यन्तरापेक्षस्योपकारपरंपरायातद्वस्थैक्या। उपकारेणाप्युपकर्त्त
व्यमिति तत्परंपरापातद्व्यपरा। किं चास्योपकारस्य धर्म्मभेदं धर्म्मिणं वक्रियेत। भिन्ने तु धर्म्मिणः किमायात
तम्। न ह्यन्यस्मिन्नष्टे जाते वान्यस्य स्वरूपं किंचिद्वर्द्धत इति प्रसङ्गात्। अथ ते नापि तस्य किंचिदुपकारान्तरम
पेक्षमिति तृतीयानवस्थेति। स्यादेतत् क्षणिकोपि भावः किं निरपेक्षः सापेक्षो वा। न प्रथमः। केवलाद्वस्
रस्सहस्रेणापि कार्य्यानुपपत्तेः। न द्वितीयः। अनुपकारकापेक्षायामतिप्रसङ्गात्। तथा हि जातु जातपरो बी
जमपि पवनपाश्वस्ते जो कुरान् करोतीति पक्षे येनैव स्वभावेनाङ्कुरं करोति तेनैव पवनादीनन्यान् वा। न प्र
थमः। कार्य्याणामभेदप्रसङ्गात्। न द्वितीयः। एकस्यापि क्षणिकस्य स्वभावभेदोपपत्तेः। तदिदमभिहितं
आसनं। साहित्यकरणं लक्षणायां ह्यपेक्षायां क्षणिकस्य सापेक्षत्वादेव समर्थस्य सहकार्य्य व्यभिचारात्।

र१ वि२ त्

६८ अन्यथा पुनिरपेक्षत्वमेव। तैर्विना तस्यासत्त्वं सहकार्यानुपकार्यत्वाच्च। स्थिरस्य तु भावस्य तैर्विनापि अस्तीति सम-
र्थः किं न कुर्यादिति विशेषः। एकस्यैवानेककार्यकारिस्वभावस्य स्वकारणादुत्पत्तेः। कार्यभेदेन स्वभावभेदापाद-
नस्यापि दूरनिरसनात्। न च स्थैर्यपक्षेप्ययं न्यायः संभवति। उत्पत्तेरनन्तरमेव तावत्कार्यकरणप्रसङ्गात्। तदे-
तस्य तत्स्वभावत्वादिति। एतेनैकजातीयत्वैकदेशताप्रसङ्गोपि निरस्तो वेदितव्यो। तस्मात् क्रमयौगपद्ययोर्व्यापक-
योर्व्यावृत्तेरक्षणिकाद्वा वर्त्तमानार्थक्रिया क्षणिके विश्राम्यतीति प्रतिबंधसिद्धिः। अन्वये न चायं विरुद्धधर्मा-
ध्यस्तं तन्नानाय यथा शीतोष्णे। कालभेदेन विरुद्धधर्माध्यस्तश्च विवादास्पदीभूतो भावः। न चायमसिद्धः। साम-
र्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्ययसिद्धत्वात्। तथा हि यद्यदा यज्जननसमर्थं तत्तदा तत्करोत्येव यथा सामग्री स्वका-
र्यं समर्थश्चायं भावो वर्त्तमानार्थक्रियाकरणकालेऽतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः स्वभावहेतुः। सा-
मर्थ्यमात्रानुबंधित्वादर्थक्रियाकारित्वस्य। यद्यदा यन्न करोति तत्तदा तत्रासमर्थं यथा शिलाशकलमंकुरे।
न करोति चैष वर्त्तमानार्थक्रियाकरणकालेऽतीतानागते अर्थे क्रिये इति व्यापकानुपलब्धिः प्रसङ्गविपर्यय ६८

त:१

इति। अत्र संक्षेपः। किंचिदुच्यते। सत्त्वं तावदसिद्धं क्षणिकतया व्याप्तत्वासिद्धमसिद्धभेदोऽस्माकं संदिग्धवि-
पक्षव्यावृत्तिकतया संदिग्धानैकान्तिकमनैकान्तिकप्रभेदो बौद्धस्य। न हि कुतोऽपि दृष्टान्तात् आक्षेपकरणाद्धर्मत्वोत्प-
त्त्यनन्तरकारित्वादिशब्दवाच्यादन्यादृशं सामर्थ्यमुपादाय प्रसङ्गाद्यवकाशः। तथाभूतं च संदिह्यते। न ह्येवं-
भूतत्वे भावस्य प्रत्यक्षमनुमानं वा संभवति। सहकारिषु सत्सु करोति तैर्विना न करोतीत्ययमस्य स्वभावो दर्शनान-
ति क्रमेणाभ्युपगम्यतेऽविरोधात्। उभयवादिसिद्धत्वाच्च। त्वयाप्येतदवश्यमभ्युपगमनीयम्। क्षणिकोपि हि भावः
कुर्वद्रूपः सहकारिभिः सहैव करोतीति नियतस्वभावोऽन्यथा सहकारिणामसहकारित्वप्रसङ्गात्। ततोऽन्वय-
नियम ४ मैरेव तैर्विना न करोत्येवेति व्यतिरेकोऽपि वर्जनीयः। अन्वयव्यतिरेकयोरन्यतरनियमस्यान्यतरसिद्धिनान्त-
रीयकत्वादिति बौद्धस्थितेः। तथा चैतैर्विना कृतस्य करणमापाद्यमानमापादकमेव व्याहन्तीति। नन्वत्रो-
क्तम्। तैः सहैव करोतीति स्वभावाभ्युपगमे सहकारिता न जहात्। प्रत्युत गललेपाशेन बद्धाकृष्या नये-
दिति। सत्यमुक्तम्। आत्मानमवीक्षमाणेन तु तदत्र पितम्। तवापि हि व्यतिरेकनियमे सहकारिणः स्वकारणा

कि०गा०ली

६८ दापततोपिनिवार्य्येनकुर्य्यात ।ते र्विनानकरोतीत्ययमस्यहिस्वनावः।अथतैःसहैव करोतीत्ययमस्यहिस्व ६८
भावः।एवंतर्हिविरोधः स्यात ।स्यादेतत ।स्वकारणाधीनसन्निधयः सहकारिणः।तेषामुपनयनापनययोरय
मनीश्वर एवेत्यनुपबन्धेनतदुच्यते।यदि सहकारिणोनस्युर्न्नकुर्य्यादिति।तद्विनाकुसामर्थ्यानास्त्ये
वनावइतिचेत ।नन्वस्माकमप्येवमस्तु ।स्वकारणाधीनसन्निधीनांसहकारिणामुपनयनापनयनयोर
यमनीश्वरएव।यत्तुपबन्धेनतदुच्यते।यदिसहकारिणःस्युःकुर्य्यात।नतु तेतदानींसंतीति।स्यादेत
त।तैःसहकरोति।तैर्विनानकरोतीत्ययमस्यस्वनावइत्यावयोःसमोत्त्युपगमः।किंत्वयं विशेषः।तैःस
हकरोतीतियोस्यस्वनावःसप श्चादस्तिनास्तिवा।प्रथमेपश्चादपिकुर्य्याद्द्वितीयेऽस्मन्नायाघातइति।
अथतथापिमतेतैःसहकुर्वतोयोस्यतैर्विनानकरोतीतिस्वनावःसयद्यस्तितदानकुर्य्यादेव।नास्तिचेत्तद्य
तिरेकव्याकृतावन्वयव्याहतिरितिस्वरूपस्तनिप्रसंगः।स्वरूपमस्त्येवतैर्विनानावमात्रंतुनास्तीतिचेतामभा

५२

कि१
वप्रत्युत्तरकालंस्वरूपमस्तितत्सहिभावमात्रंनास्तीतिसमः समाधिः।तस्मात्सहकार्य्यन्वयव्यतिरेकोपलक्षित
मपेक्षितंचकार्य्येणास्यरूपमेवनावानांतादृशंदेवतेसामर्थ्यपदार्थः।तदेवचसहकार्य्यान्वयमपेक्ष्यक
र्वदित्युच्यते।तद्व्यतिरेकमपेक्ष्यैवाकुर्वदितियुक्तमुत्पश्यामः।अथवास्तुसमर्थोसमर्थश्चनावः।तथापिक्षणिक
पक्षइवकालभेदेनाविरोधात्सिद्धौविरुद्धधर्म्मोध्यासः।कथं।यद्यपिक्षणिकपि भावःस्वकालस्यएकामपिक्रि
यांविदधक्रियांकरोतितदातामेवार्थक्रियांकालान्तरेपिकुर्यन्नकरोतीतिपरिनावयअसत्त्वादितिचेत।किमत्राऽस
त्त्वेन।लक्षितस्यप्रयुक्तंकरणम।तथासतिदेशान्तरेपिकुर्य्यात।तस्मात्तत्रकालदेशवासत्त्वमावाच्चत।यदिसमर्थस्तदा
कुर्य्यादेव।अतएवस्वप्नावसानिकंविज्ञानंप्रहरान्तरितमपिसुषुप्तस्यजागरादयज्ञानमुत्पादयतीतिप्रज्ञाकरः।असम को४
मर्थ्यादेवतर्हिनकरोतीतिचेत।तर्हितामेवार्थक्रियांप्रतिसमर्थोसमर्थश्चेत्यापतितं।कोदोषःकालभेदादिति बौद्ध:४
चेत।स्थिरेप्येवमेवादोषोस्तु।असत्त्वमेवासामर्थ्यमितिचेत।न।उक्तोत्तरत्वात।सामर्थ्यस्वकालस्यएवतद
तामेवार्थक्रियांकुर्वाणोगीर्वाणशापेनापिनापहस्तयितुंशक्यते।किंपुनस्तवाक्तुनास्ममपीडाजनितविक्लवविक्रोशमा

७० चेत्। असामर्थ्ये तदापि न कुर्यात्। किंच। यस्य यतः सत्त्वमधिकं नास्ति। किंतु स एव भावः। तदा कथं न विरुद्धध ७०
र्म्माध्यासः। एकस्य विधिनिषेधयोरेकभावत्वानुपपत्तेः। कानुपपत्तिः। सांप्रतं यद्यप्यस्ति। कालान्तरे च नास्तीति चेत्॥
सामर्थ्यासामर्थ्ययोरप्येवं वस्तु। प्रथमं समर्थस्यासमर्थस्य वा पश्चात् स्वभावविपर्ययः कुत आगत इति चेत्॥
प्रथमं सतोऽसतो वा पश्चात् स्वभावविपर्ययः कुत इति तुल्योऽनुयोगः। नायं स्वभावविपर्ययः। किंतु स्वकालदेश
स्य एवान्यदेशकालयोरसद्व्यवहारकारी स्वकारणादेवायात इति चेत्। ममापि सामर्थ्यं क्रियां प्रति तदानीं स
मर्थ एवान्यदा न समर्थ इति स्वकारणादेवायात इति तुल्यं। तस्मात् सामर्थ्यक्रिययोरनन्तरेव कर्तव्यत्वान्नान्यदेति स्व
भावनियमः। एतयोरपि दर्शनयोः समानः। अन्यदानुन कर्तव्यैवेति क्षणिकपक्षेऽन्यदेव कर्तव्यमिति स्थि
रपक्ष इति विशेषः। न चान्यदान्यकरणात् तदा तत्करणयोः कश्चिद्विरोधो देशभेदेनार्थक्रियाभेदनियम
वदुपपत्तेः। तस्माद्देशकालविषयभेदेन करणाकरणे सामर्थ्यासामर्थ्ये वा विरुद्धे एव न भवत इत्य

न्यो विरुद्धधर्म्मोऽनुसर्तव्यः। स यत्र नास्ति तत्र क्षणावदनवधेरपि गगनादेरभेदोऽध्यवसातव्य इति रहस्यं वि
स्तरस्त्वात्मतत्त्वविवेके न्यायकुसुमाञ्जलौ वानलसधियां सुलभ इति॥ एवं स्थैर्ये सिद्धे ननु बुद्धेरेव रूपाद
यं गुणत्वात्। न च गुणगुणिनोरभेदो विरुद्धधर्म्माध्यासादिति संक्षेपतः सर्वं सुस्थम्॥ स्यादेतत्। तत्किं सु
खादय एवात्मनो गुणाः यद्येते रेवमुपलभ्यन्ते। नन्वेवं बुद्ध्यदृष्टादीनामगुणत्वेऽन्यगुणत्वे वा बुद्धिविघ्न
वेत्। सुखादीनामपि चात्मगुणत्वं न सिध्येत् संयोगाद्यभावे तेषामङ्कुराणां कादाचित्कत्वानुपपत्तेरित्या
शंक्याह। तस्य गुणा इति। तेषां प्रत्यक्षसिद्धत्वेऽपि गौरवात्। सूत्रकारानुमतिमाह। आत्मलिङ्गाधिकार
इति। प्राणादिसूत्रे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। यद्यपि बुद्धिसूत्रे कण्ठरवेण नास्ति तथापि सुखादय एव स्व
कारणतया तामाक्षिपन्ति। न ह्यन्यसमवेतयेष्टादिबुद्ध्यान्यस्य सुखादिकमुत्पाद्यते। तथा त्वदेवदत्तेन च
न स्पर्शमिच्छुर्भवति यज्ञदत्तस्य सुखमुत्पद्येत। इन्द्रियान्तरविकारात् भयदर्शित्वं दिव क्षेता बुद्धिगुणत्व

७१ मात्मनोदृष्टिलिमितिन्नावः। धर्म्माधर्म्मौवात्मैकगुणौ नामकारणवचनादिति। निषिद्धविहिताचरणान
धर्म्माधर्म्मौ जायेते। चिरध्वस्तस्य कर्म्मणः कालान्तरभाविफलहेतुत्वानुपपत्तेः। तौ क्कुत्र जायेतामित्य ७१
पेक्षायामुत्तरं कारणेति। आत्मान्तरगुणानामात्मान्तरगुणोऽधिकारणत्वादिति। तस्यार्थः। अन्यसमवेता
भ्यां धर्म्माधर्म्माभ्यामन्यस्य सुखदुःखानुत्पत्तेः। उत्पत्तौ वा कृतहानाकृताभ्यागमप्रसङ्गात्। न चान्यस
मवेतत्वेपि तत्कृतेन नियमो भविष्यतीति वाच्यम्। अदृष्टविगादिष्वपि प्रसङ्गात्। दृष्टप्रयोजनापेक्षितत्वे
ऽपि तेषां तत्कर्तृत्वात्। न हि दृष्टापेक्षया तत्कर्तृत्वं कर्म्मणो निवर्त्तते। तस्य प्रमाणार्थः। देवदत्तगुणविशेषप्र
रितभूतकार्यास्तदुपगृहीता भूतशरीरादयः। कार्यत्वे सति तद्भोगसाधनत्वात्। स्रगादिवदिति। जातेष्टि
पितृयज्ञाभ्यामपि पुत्रपितृगामिफलसिद्धिः। तदाप्यपूर्वं जनकद्वारैव स्वस्य व्यभिचारः। अन्यकृतेनक
र्म्मणान्यत्रापूर्वोत्पत्तिरिति च शास्त्रसिद्धं अदृष्टविगादिवदिति। तदेवं धर्म्माधर्म्मौ चात्मगुणौ मुनेरनुमतौ।
संस्कारस्तदनुमतिमाह। संस्कारःस्मृत्युत्पत्ताविति। अनेनात्ममनसोः संयोगात्संस्काराच्च स्मृतिरिति सूत्रं स्मारय ति।

न चान्यत्र संस्कारेणान्यत्र स्मृतिः। देवदत्तेनानुभूते यज्ञदत्तस्य स्मरणप्रसङ्गात्। अतोऽनुभवसमानाश्र
यः संस्कारः सिद्ध इत्यर्थः। व्यवस्थावचनात्संख्येति। नानात्मानो व्यवस्थात इति सूत्रं दर्शितम्। द्रव्यत्वेन सामान्य
तः संख्यायां सिद्धायां किं पृथिव्यादिवद्बहुत्वं उताकाशादिवदेकत्वमतो नानात्वं दर्शितं तन्न। तुरीयकत्या
बहुत्वसंख्या दर्शितेत्यर्थः। अथ कोऽयं व्यवस्था। नियमः। प्रथमतस्तावत्कश्चित्संसरति कश्चिदपवृक्त इति। यदि चै
क एवात्मा मुक्तः प्रज्ञादेवामुक्त इति कोऽपरः संसरेत्। न चेयता कालेनापवृक्त एव कश्चित्। तथा सति नापवृ
ज्येतैव। न हि महाभासंसारे यन्नवृत्तं तद्भविष्यतीति संभवति। न चैवं धर्म्माज्ञाविवेकस्य सत्त्वं संभवतो विरोधात्। अपरा व्य
वस्था कश्चिदीश्वरः कश्चिदनीश्वर इति। न चेश्वरो नाम जगति नास्ति। तत्सद्भावे यत्नस्य कृतत्वात्। नाप्य
स्मदादयः स्वात्मनि सार्वज्ञं सर्वकर्तृत्वं वावगच्छंति। उपदेशाद्यपेक्षत्वादिच्छाविघाताच्चेति। अन्या च व्यवस्था क
श्चित्सुखी कश्चिद्दुःखीत्यादि। ननु पादे मे सुखं शिरसि मे वेदनेत्यादिवच्छरीरभेदेनैकस्यापि सुखदुःखयोर्व्यवस्था

७२ तांकोदोषः। नह्यमेकस्यसुखदुःखेनन्वतइति। किंतुयोऽहंदेवदत्तःसुखीसोऽहंयज्ञदत्तोदुःखीतिसंधानंस्यादि ७२
तिक्रमः। अप्रतिसंधानमपिशरीरभेदेनैवोपपद्यते। जन्मान्तरसुखादिवदितिचेत्। न। तत्रसंस्कारस्यासत्वा
दत्रैनवादनुद्भवाद्वातदुत्पत्तेः। नचैवमिदानीमपिस्यात्। यज्ञदत्तवद्देवदत्तेऽप्यप्रतिसंधानप्रसङ्गात्। तत्र
विद्यावशादात्मनोपिसुखादयोनात्मीयतयाप्रतिसंधीयन्तइतिचेत्। न। यज्ञदत्तवद्देवदत्तेनाप्यात्मीयतयाऽप्रति
पत्तिप्रसङ्गात्। परमविदुषेऽप्यरेवास्मदादिदुःखस्यस्वीयतयाप्रतिसंधानापत्तेश्च। एतेनजीवानामैक्यव्य
वस्थानन्तुपरब्रह्मणाद्वैतिनिरस्तम्। अतोव्यवस्थातत एवात्मानस्तन्ते भिन्नाश्चेति स्थिते परब्रह्मणिचेष्ट
साऽन्यस्मिन्प्रमाणान्नावात्। अथैकात्म्यश्रुतिविरोधइत्यपिनास्ति। मुमुक्षुर्सर्वंविकारयस्यात्मप्रतिष्ठेनन्वि
तव्यं। नचैकएवेतितात्पर्यमिति। पृथक्त्वमप्यतएवेति। यतःसंख्यातत्रसिद्धाऽतःपृथक्त्वमपिसंख्यानुविधा
नात्तस्येत्यर्थः। उत्पत्वेनपरिमाणयोगेसिद्धेसत्याह। तथाचात्मेतिवचनादिति। विभुत्वान्महानाकाशस्तथात्मे
चा।

ति~~...~~तिस्तत्रस्मारयति। विभुत्वाद्यथाकाशमहत्तथात्मतएवविभुत्वादात्मापिमहानित्यर्थः। विभु
त्वमेवतस्यकुतइतिचेत्। तत्कार्यस्यज्ञानसुखादेःसर्वत्रदर्शनात्। शरीरस्यगत्यैवतदुपपन्नमितिचेत्। न। अवर्त्ति
त्वात्। एतदपिकुतइतिचेत्। परमाणुत्वेप्रत्यक्षत्वप्रसङ्गात्। प्रत्यक्षगुणानधिकरणत्वप्रसंगाच्च। अवय
वित्वेऽनित्यत्वप्रसङ्गात्। आदिमत्वपातावीतरागजन्मापत्तेश्चेति। एवंसर्वत्रकारानुमतिदर्शनकत्वेनबुद्ध्यादिपरि
माणान्तेषुप्रमाणाभावादर्शितम्। संप्रतिसंयोगविभागवानात्माद्रव्यत्वात्पृथिवीवदितिप्रमाणस्यतर्कमाह। स
न्निकर्षजत्वादिति। सहकार्यन्तरानपेक्षस्यात्मनःसुखादिकारणत्वेतेषांसततोत्पत्तिप्रसङ्गात्। निमित्तमात्रा
पेक्षित्वेपिसर्वत्रोत्पत्तिप्रसङ्गात्। तथाचशरीरावच्छेदेतदुत्पत्तिनियमोनस्यात्। शरीरेणात्मावच्छेदस्यचसंयोगा
दन्यस्यानुपपत्तेः। एवंमनःसंयोगोऽसमवायिकारणत्वेनव्याख्यातः। अदृष्टवदात्मसंयोगश्चज्वलनपवना
दिक्रियाकारणत्वेनबोद्धव्यः। तद्विनाशकत्वाद्विभागइति। यद्यात्मनिविभागोनस्यात्उत्पन्नोपिसंयोगोन

कि०मा०

विनश्येत्। आश्रयाविनाशादिति भावः॥ ॥मनस्त्वं। जातिसंबन्धान्मन इति॥ मनस्त्वं नाम सामान्यविशेषस्त
७३ दभिसंबंधान्मन इत्यर्थः। ननु मन एव न सिद्धं कुतो मनस्त्वमित्यत आह। सत्यपीति। यद्यस्मिन्सत्यपि ७३
कदाचिन्न भवति तत्तदतिरिक्तापेक्षम्। यथा सत्यपि तुर्यादिसन्निकर्षे कदाचिदजायमानः पटस्तदतिरिक्तं कुविंदाद्यपेक्षते
। सत्यपि चात्मेन्द्रियार्थसन्निकर्षे कदाचिज्ज्ञानसुखादिकं न भवति तस्मात्तदतिरिक्तापेक्षं यच्च तदपेक्षणीयं तदेव
मन इत्यर्थः। अपेक्षणीयान्तराभावे प्रागपि कार्योत्पादप्रसङ्गात्। व्यासङ्गे चेतल्लक्षणीयम्। तथा च चक्षुरादियौ
गपद्याभिमानः शतपत्रपत्रशतव्यतिभेदवदाशुभावादुन्नीयः। अदृष्टमपेक्षणीयं न विषयतीति चेन्न। तदि
तरकारकचक्रसाकल्येपि तदसन्निधेरनुपपत्तेः। तदसन्निधेस्तदितरसाकल्यस्यानुपपत्तिरिति। लिङ्गान्तरमाह
श्रोत्रादीति। स्मृतिः शरीरावच्छिन्नात्मसंयुक्तइन्द्रियसाध्या। कार्यत्वे सत्यात्मविशेषगुणत्वात्। रूपादिज्ञानवत्।
यत्तद्व्यंतन्मनः। श्रोत्रादिष्वन्यतमद् विषयतीति चेत्। अत उक्तम्। श्रोत्राद्यव्यापार इति। अन्यथा समवायि

कारणाभावे तदनुत्पादप्रसङ्गात्। विषयविशेषकार्ये च तद्व्यापारोपरमो लक्षणीयः। लिङ्गान्तरमाह। बाह्येति। सुखा
द्युपलब्धिरिन्द्रियसाध्या जन्यसाक्षात्कारत्वाद्रूपाद्युपलब्धिवत्। श्रोत्रादिकमेव तत्साधनं न विषयतीत्याशंक्यो
क्तम्। बाह्येन्द्रियैः श्रोत्रादिभिरगृहीतेति। यदि हि बाह्येन्द्रियैः श्रोत्रादिभिः सुखादयो गृह्येरन् अन्धबधिरादिभिर्नोपल
भ्याः स्युरित्यर्थः। सुखादीनां बुद्धेरन्यत्वं बुद्धेः स्वसंवेद्यत्वं च वक्ष्यते। एवं सिद्धे मनसि व्यक्तिभेदासिद्धौ सत्यां नियत
कार्यतया मनस्त्वमपि सेत्स्यतीत्यभिप्रायवांस्तस्य गुणानाह। तस्येति। यद्यपि द्रव्यत्वादिवत् संख्यादिपञ्चकं सि
द्धं तथापि सूत्रकारानुमतिप्रदर्शनव्याजेन विशेषं विवक्षन्नाह। प्रयत्नेति। अणुत्वे हि मनसो बहुत्वमर्थे सिद्ध
मन्यथैकस्मिन्नेकत्र वर्तमाने शरीरान्तरे तत्कार्यं ज्ञानादि न स्यात्। अतो बहुत्वे सत्येकस्मिन्नपि शरीरे तैर्बहुभि
र्युगपज्ज्ञानोत्पत्तिप्रसङ्गः स्यादवस्थः। तत्क्रमे कस्यचिन्नु तदस्तित्याशंक्य सूत्रकृतोक्तम्। प्रयत्नज्ञानायौगपद्यादे
कं मन इति। एकस्मिन्शरीरे एकैकमेव मनः। प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्च। अणुत्वं च प्रतिशरीरमेकत्वम्

७४ प्यनुमातव्यमित्यर्थः। पृथक्त्वमप्यत एव संख्यानुविधानादेवेत्यर्थः। तदभाववचनादणुपरिमाणम्। तदभावादणु ७४
मन इति सूत्रकारवचनात्। तद्धर्मेन पूर्वोक्तं विभवं परामृशति। तेन विभवाभावादित्यर्थः। विभवाभावश्च ज्ञानायौग
पद्यादित्यर्थः।। विभवे ह्येकेन्द्रियग्राह्या इवानेन्द्रियग्राह्या अपि रूपादयो विषयाः सकृदेव ज्ञाप्येरन् कारणायौ
गपद्यात्। एतेन स्पर्शशून्यत्वादयः परेषां विभुत्वे हेतवः कालात्ययापदिष्टा वेदितव्याः। यद्येवमणु मनः कथं तर्हि
द्विस्त्रिः छिन्नानामपि गृहगोधादिशरीराणामुत्पतनोत्पतनोपसर्पणादिचेष्टाविशेषाः।। न ह्यविभुनैकेनानेका
धिष्ठानं संभवतीति चेत्। तद्भूणामदृष्टोपग्रहप्रयत्नवशात्कर्म्मोपगृहीतान्तःकरणान्तरैः शाद्धेति न किंचिदेतत्। अप
सर्प्पणोपसर्प्पणवचनात्संयोगविभागादिति। अपसर्प्पणमुपसर्प्पणमशितपीतसंयोगाः कार्य्यान्तरसंयो
गाश्चादृष्टकारितानीति सूत्रकारवचनात्। अपसर्प्पणं पूर्वशरीरविभागहेतुर्म्मनःकर्म्म उपसर्प्पण
मुत्तरशरीरप्राप्तिहेतुर्म्मनःकर्म्म ततः संयोगविभागौ सिद्धौ। अन्यथा तदनुपपत्तौ प्रेत्यभावानुपपत्तिरिति भावः।

स्यादेतत्। मनसोऽतीन्द्रियत्वात्परापरव्यवहारायोगात्प्रयत्नादृष्टोपग्रहाच्च क्रियोपपत्तौ परत्वापरत्ववेगाभ्यु
पगमो निर्बीज इत्यत आह। मूर्त्तत्वादिति। मूर्त्तत्वस्य तैः सहस्य भाव[illegible]तः संबंधात्तेन ते अनुमातव्याः। न हि प्रात्य
क्षिक एव संव्यवहार इति नियमो धूमाद्यनुमितेवह्न्यादौ तद्व्यवहाराभावप्रसङ्गात्। नाप्यदृष्टोपग्रहप्रयत्ने
ण क्रियोत्पत्तौ वेगो न स्यात्। ज्वलत्पवनादौ तदभावप्रसङ्गादिति भावः। स्यादेतत्। मूर्त्तत्वाद्द्रव्यारंभकत्वं म
नसः किं न स्यादित्यत आह। अस्पर्शवत्त्वादिति। न हि मूर्त्तत्वस्य द्रव्यारंभकत्वेन स्वाभाविकः संबंधो विप
क्षे बाधकाभावात्। स्पर्शवत्त्वं तु द्रव्यारंभकत्वे प्रयोजकम्। द्रव्यानारंभे स्पर्शवत्तायाः प्रमाणाभावाद
नुपभोगयत्वप्रसङ्गाच्च। तदीयकार्य्यान्तरस्याप्यभावादिति। न च मूर्त्तत्वेन स्पर्शोऽनुमातव्यः। तद्विरहेणावा
मूर्त्तत्वम्। मूर्त्तत्वस्य स्पर्शविरहे विरोधाभावात्। विभुत्वाभावस्य च परममहत्त्वेन सहजविरोधादि

७५ स्याह्। क्रियावत्वान्मूर्त्तं मन इति प्रक्रमात्। क्रियावत्वेनाविभुत्वमुपलक्षयति। स्यादेतत्। क ७५
रणत्वेन मनसः पूर्वं ज्ञातृत्वं प्रतिषिद्धं तदनुपपन्नं ज्ञानकरणत्वज्ञातृत्वयोर्विरोधाभावात्।
प्रयोक्तृप्रयो[illegible]ज्ययोः कथमेकत्वमिति चेत्। तथापि मेयो ऽस्तु कुतस्त्वज्ञत्वमत आह। साधार
णेति। तथा चैकाभिप्राय नियमेन प्रवृत्तिनिवृत्ती न स्याताम्। प्रत्युताभिप्रायविरोधान्न प्रवृत्ति
र्निवृत्तिश्च स्यादिति भावः। [illegible]वमज्ञत्वं [illegible] स्वार्थिगुणाः स्वरूपतश्च परार्थमतीन्द्रियत्वादत
आह। करणाभावादिति। तथापि मूर्त्तस्य विशेषगुणायोगः स्यात्। अन्यथा द्रव्यत्वमपि न स्यात्॥
मूर्त्तसमानाधिकरणस्य [illegible]स्य विशेषगुणावत्वव्याप्तत्वादत आह। गुणावत्वाद्द्रव्यम्। अविभुत्वे
वान्मूर्त्तत्वेपि गुणावत्वाद्विशेषगुणारहितस्यापि द्रव्यत्वाविरोध इत्यर्थः। तथापि गुरुत्वद्रवत्वस्थि

७६ अविच्छिन्नश्चिदात्मैकपुमान्स्त्रीह्नेनेतरः। संकल्पवशाद्देही निःसंकल्पश्च मुच्यते। अक्षरग्रहणाहितवे ७६
चयास्त्रसम्वर्त्तुलत्वद्दृषत्परिग्रहः। बुद्धिशुद्धिनिरूपाधिलक्षयेदारुमृन्मयशिलामयार्चनम्। बालि
कारचितवस्त्रपुत्तिकाक्रीडनेन सदृशं तदर्चनम्। यत्र शाम्यति मनो हि निर्मलं तद्धि शुद्धं निरूपा
धिचिन्मयम्। ३

83/7

तिस्थापकान्नावेककर्थं क्रियावच्चं वेगस्य क्रियोत्तरकालीनत्वात् । न हि मूर्त्तत्वमात्रेण क्रियेत्यत आह
प्रयत्नादृष्टपरिग्रहादिति । क्वचित्प्रयत्नपरिग्रहात् क्वचिददृष्टपरिग्रहादित्यर्थः ॥ ॥ इति शब्दोद्द
व्यपदार्थपरिसमाप्तौ ॥ ॥ वंदे शिवं शिवमिवोदयनं निदानमेकं गभीरनयनं ह्यविवेसिंधोः । दोषा
करादपि विविच्य कलां नजल[illegible]तः कृतीजनिपदं सुमनः संसैः ॥ छ ॥ ॥ इति श्रीमन्महोपाध्याय
उदयनकृतौ किरणावल्यां द्रव्यपदार्थः समाप्तः ॥ ॥ श्रीमज्झोपाल्वदंडिपकटगुणगणो द्वैतसिद्धांतदृंतामन्ना
तत्वस्य षक्षांप्रचुरमतियुतो दर्शनानां श्रुतं युः वर्षे श्रीमल्लमाथिन्यकवरन्नृपतौ शासति त्वामदत्त्रं भाद्रे
शुक्ले नुमत्यां विदिलिपिमकरो छूल्लपूर्णाविवाख्ये ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७४